कर्णाटकप्रशासनम्

# संस्कृतनन्दिनी – २

## नवमकक्ष्या

### प्रथमभाषा संस्कृतम्

(Revised)

©KTBS Not to be republished

9

# SAMSKRITHA NANDINI-2

## Ninth Standard

### First Language - Sanskrit

**KARNATAKA TEXTBOOK SOCIETY (R)**
**100 Feet Ring Road, Banashankari 3rd stage,**
**Bengaluru- 560 085.**

# Preface

The Textbook Society, Karnataka has been engaged in producing new textbooks according to the new syllabi which in turn are designed on NCF - 2005 since June 2010. Textbooks are prepared in 12 languages; seven of them serve as the media of instruction. From standard 1 to 4 there is the EVS, mathematics and 5th to 10th there are three core subjects namely mathematics, science and social science.

NCF - 2005 has a number of special features and they are :

- connecting knowledge to life activities
- learning to shift from rote methods
- enriching the curriculum beyond textbooks
- learning experiences for the construction of knowledge
- making examinations flexible and integrating them with classroom experiences
- caring concerns within the democratic policy of the country
- making education relevant to the present and future needs.
- softening the subject boundaries-integrated knowledge and the joy of learning
- Making the child is the constructor of knowledge

The new books are produced based on three fundamental approaches namely, Constructive approach, Spiral Approach and Integrated approach.

The learner is encouraged to think, engage in activities, master skills and competencies. The materials presented in these books are integrated with values. The new books are not examination oriented in their nature. On the other hand they help the learner in the all round development of his/her personality, thus help him/her become a healthy member of a healthy society and a productive citizen of this great country, India.

©KTBS Not to be republished

The most important objectives of teaching language are listening, speaking, reading, writing and reference work. These skills have been given a lot of importance in all the language textbooks. along with the inculcation of these skills, fundamental grammar, opportunities for learners to appreciate beauty and imbibe universal life values have been integrated in language textbooks. When learners master these competencies, they would stop studying textbooks for the sake of passing examinations. In order to help learners master these competencies, a number of paired and group activities, assignments and project work have been included in the textbooks. It is expected that these activities would help learner master communicative skills. Ultimately, it is expected that students master the art of learning to learn and make use of these competencies in real life.

The Textbook Society expresses grateful thanks to the chairpersons, writers, scrutinisers, artists, staff of DIETs and CTEs and the members of the Editorial Board and printers in helping the Text Book Society in producing these textbooks. A few works of some writers and poets have been included in these textbooks. The textbook society is extremely grateful to them for giving their consent for the inclusion of these pieces in the textbooks.

©KTBS Not to be republished

**G . S . Mudambadithaya**
Co-ordinator
Curriculum Revision and
Textbook Preparation
Karnataka Textbook Society®
Bengaluru, Karnataka.

**Nagendra Kumar**
Managing Director
Karnataka Textbook Society®
Bengaluru, Karnataka.

# प्राक्कथनम्

''भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती'' इति उक्त्यनुसारेण संस्कृतभाषा प्राचीनकालादपि ग्रान्थिकभाषा व्यवहारभाषा च अस्ति । वैदेशिकानां आक्रमणेन, प्रशासनेन च जनमानसत: किञ्चित् दूरं गतापि समग्रे जगति संस्कृतानुरागिणां शिक्षकाणां संस्कृतप्रचारसंस्थानाम् च निरन्तरप्रयत्नात्, सा व्यवहारपथे आनीयमाना अस्ति । अत: संस्कृताभिमानिन: पुनरपि एतां भाषां सादरम् अधीयमाना: सन्ति ।

कर्णाटक प्रशासनस्य आदेशानुसारं संस्कृतस्य अध्ययनार्थं भाषाज्ञानार्थं च पाठ्योजना, मार्गदर्शकप्रश्नपत्रिकास्वरूपम् पदकोष: च अध्यापकेभ्य: साहाय्यार्थं प्रदत्त: अस्ति । २००५ तम वर्षस्य राष्ट्रियपाठ्यक्रमस्य नियमानुसारं रचितम् इदं पाठ्यपुस्तकम् अनधीतसंस्कृतानाम् अपि सहायकं भवेत् इति अस्माकम् आशय: । पाठ्यपुस्तकनिर्माणे साहाय्यं कृतवद्भ्य: सर्वेभ्य: कृतज्ञता समर्प्यते ।

बेङ्गलूरु

**पि श्रीधर आचार्य:**

**अध्यक्ष:**

पाठ्यपुस्तकरचना समिति:

**अध्यापकेभ्य: सूचना :-**

१. अर्धमासं यावत् सेतुपाठ: भवेत् ।
२. आरम्भे ''गुरूपदेश:'' इति उपनिषद्भाग: अस्ति । एतत् केवलं अध्ययनार्थं भवति न परीक्षानिमित्तम् ।
३. 'समुचितं पदं चिनुत' इत्यत्र कदाचित् पाठान्तर्गता: अंशा: अपि प्रश्नरूपेण भवितुम् अर्हन्ति ।
४. श्लोकतात्पर्यं लिखत, दीर्घम् उत्तरं लिखत, इत्येतदुभयमपि मातृभाषया भवितुमर्हति।
५. एकैकस्य पाठस्य अन्ते 'अवधेयांश: क्रियाकलाप:' इति कश्चन भाग: प्रदत्त: । अयं केवलम् अभ्यासार्थमेव । परीक्षावसरे तद्विषये प्रश्ना: नैव प्रष्टव्या: ।
६. अन्ते मार्गदर्शिनी प्रश्नपत्रिका प्रदत्ता । सा केवलं मार्गदर्शनार्थम् ।
७. गद्यपाठान्तर्गता: श्लोका: 'श्लोकतात्पर्यं लिखत' इत्यत्र प्रश्नरूपेण नैव देया: ।
८. लेखनकलां पठनकलां च वर्धयितुम् उक्तलेखनं पाठवाचनादीनि पद्यानां गायनं नाटकानां अभिनयं च छात्रद्वारा कारयितुं, शक्यानि ।

©KTBS Not to be republished

# पाठ्यपुस्तकरचनासमितिः

**अध्यक्षः**

**श्री पि.श्रीधराचार्यः,** एम्,ए,(संस्कृते इतिहासे च), बि.एड्. प्रधानाचार्यः, श्रीमद्भुवनेन्द्रप्रौढशाला कार्कळ, उडुपि मण्डलम्।

**सदस्याः**

**विद्वान् ए.एस्.के.वसिष्ठः,** एम्.ए.बि.एड्. संस्कृतप्राध्यापकः, सिलिकान् पदवीपूर्वमहाविद्यालयः कोणनकुण्टे, बेङ्गलूरु.

**विद्वान् परमेश्वर.वि.भट्टः,** एम्.ए.बि.एड्. संस्कृताध्यापकः, स.बा.प.पू.का.हासनम् ।

**विद्वान् जयराम भट्टः,** एम्.ए.बि.एड्. संस्कृताध्यापकः, महाराज स.प.पू.का.मैसूरु ।

**विद्वान् चिदानन्दस्वामी सि. हिरेमठ,** एम्.ए.बि.एड्. श्रीबसवेश्वर नूतन प्रौढशाला, बागलकोटे ।

**विद्वान् महेश नरसिंह भट्टः** , एम्.ए. बि.एड्. के.एन्.के.बालिकाप्रौढशाला, धारवाड.

**श्री गुल्जारः, चित्रकलाशिक्षकः,** स.प्रौ.शाला, दोड्डशिवरा, मालूरु, कोलार.

**परिशीलकः**

**विद्वान् बैलूरु नारायण तन्त्री,** एम्.ए.बि.एड्. निवृत्तः संस्कृताध्यापकः, केनरा प्रौढशाला, मङ्गलूरु ।

**सम्पादकः**

**डा. कोटेमने रामचन्द्र भट्टः,** निर्देशकः, वेदविज्ञानशोधसंस्थानम्, बेङ्गलूरु.

**प्रमुखसंयोजकः**

**प्रो.जि.एस्.मुडम्बडित्तायः,** क.प.पु.सङ्घः रि, बेङ्गलूरु ।

**प्रमुख मार्गदर्शकौ:**

**श्री नागेंद्र कुमार,** व्यवस्थापक निर्देशकः, क.प.पु.सङ्घःरि, बेङ्गलूरु.

**श्रीमती सि. नागमणी, उपनिर्देशकः** (प्रभारी), , क.प.पु.सङ्घःरि, बेङ्गलूरु.

**संयोजकः**

**श्रीमती. एस्. एन्. लीलावती,** ज्येष्ठसहायक निर्देशकः, क.प.पू.सङ्घः रि, बेङ्गलूरु ।

©KTBS Not to be republished

# About the Revision of Textbooks

Honourable Chief Minister Sri Siddaramaiah who is also the Finance Minister of Karnataka, in his response to the public opinion about the new textbooks from standard I to X, announced, in his 2014-15 budget speech of constituting an expert-committee, to look into the matter. He also spoke of the basic expectations there in, which the textbook experts should follow: "The textbooks should aim at inculcating social equality, moral values, development of personality, scientific temper, critical acumen, secularism and the sense of national commitment", he said.

Later, for the revision of the textbooks from class I to X, the Department of Education constituted twenty seven committees and passed an order on 24-11-2014. The committees so constituted were subject and class-wise and were in accordance with the standards prescribed. Teachers who are experts in matters of subjects and syllabi were in the committees.

There were already many complaints, and analyses about the textbooks. So, a freehand was given in the order dated 24-11-2014 to the responsible committees to examine and review text and even to prepare new text and revise if necessary. Eventually, a new order was passed on 19-9-2015 which also gave freedom even to re-write the textbooks if necessary. In the same order, it was said that the completely revised textbooks could be put to force from 2017-18 instead of 2016-17.

Many self inspired individuals and institutions, listing out the wrong information and mistakes there in the text, had sent them to the Education Minister and to the Textbook Society. They were rectified. Before rectification we had exchanged ideas by arranging debates. Discussions had taken place with Primary and Secondary Education Teachers' Associations. Questionnaires were administered among teachers to pool up opinions. Separate meetings were held with teachers, subject inspectors and DIET Principals. Analytical opinions had been collected. To the subject experts of science, social science, mathematics and languages, textbooks were sent in advance and later meetings were held for discussions. Women associations and science related organisations were also invited for discussions. Thus, on the basis of inputs received from various sources, the textbooks have been

©KTBS Not to be republished

revised where ever necessary.

Another important aspect has to be shared here. We constituted three expert committees. They were constituted to make suggestions after making a comparative study of the texts of science, mathematics and social science subjects of central schools (NCERT), along with state textbooks. Thus, the state text books have been enriched based on the comparative analysis and suggestions made by the experts. The state textbooks have been guarded not to go lower in standards than the textbooks of central schools. Besides, these textbooks have been examined along side with the textbooks of Andhra Pradesh, Kerala, Tamil Nadu and Maharashtra states.

Another clarification has to be given here. Whatever we have done in the committees is only revision, it is not the total preparation of the textbooks. Therefore, the structure of the already prepared textbooks have in no way been affected or distorted. They have only been revised in the background of gender equality, regional representation, national integrity, equality and social harmony. While doing so, the curriculum frames of both central and state have not been transgressed. Besides, the aspirations of the constitution are incorporated carefully. Further, the reviews of the committees were once given to higher expert committees for examination and their opinions have been inculcated into the textbooks.

Finally, we express our grateful thanks to those who strived in all those 27 committees with complete dedication and also to those who served in higher committees. At the same time, we thank all the supervising officers of the Textbook Society, who sincerely worked hard in forming the committees and managed to see the task reach its logical completion. We thank all the members of the staff who co-operated in this venture. Our thanks are also to the subject experts and to the associations who gave valuable suggestions.

Not to be republished ©KTBS

**Narasimhaiah**
Mangaging Director
Karnataka Textbook Society
Bengaluru.

**Prof. Baraguru Ramachandrappa**
Chairman-in-Chief
State Textbook Revision Committee
Bengaluru.

## परिष्करणसमितिः

१. **प्रो. बरगूरु रामचन्द्रप्पः,** सर्वाध्यक्षः, राज्यपठ्यपुस्तकपरिष्करणसमितिः, बेंगळूरु।

२. **प्रो. शिवराजप्पः**, अध्यक्षः, पठ्यपुस्तकपरिष्करणसमितिः,प्राध्यापकः, महाराज कालेजु, मैसूरु विश्वविद्यालयः, मैसूरु।

सदस्याः

१. **डा. नञ्जुण्डय्यः,** प्रांशुपालः श्री कालभैरवेश्वर संस्कृतवेदआगमशिक्षण महाविद्यालय. श्री आदिचुञ्चनगिरिक्षेत्रम्, नागमङ्गल ताल्लूकु।

२. **श्री एच्.एम्.सुधीरः,** संस्कृत शिक्षकः, स.बा.प.पू. कालेज्, अरकलगुडु, हासन मण्डलम्।

३. **श्री गजानन नारायण भट्टः,** संस्कृत शिक्षकः, इन्दिरा प्रियदर्शिनि बालिका प्रौढशाला, जे.पि. नगर बेङ्गलूरु।

४. **डा.राघवेन्द्र भट्टः,** संस्कृत शिक्षकः, सरकारी प्रौढशाला, सारक्की , बेङ्गलूरु।

५. **श्री हजरत् अली. यु,** उपन्यासकः, ललितकलाविभाग. तुमकूरुविश्वविद्यालयः, तुमकूरु।

## परिष्करणोन्नतसमितिः

१. **डा. एच्.वि.वेणुगोपालः,** निवृत्त प्रांशुपालः संस्कृत प्राध्यापकः, न्याषनल् कालेज् बसवनगुडि बेंगळूरु।

२. **डा. जे.श्रीनिवासमूर्तिः**, निवृत्त प्रांशुपालः एं.इ.एस्.कालेज्, मल्लेश्वरं, बेङ्गलूरु।

**प्रमुखमार्गदर्शकौ-**

**श्री नरसिंहय्यः**, व्यवस्थापकनिर्देशकः, क.प.पु.सङ्घः(रि), बेङ्गलूरु।

**श्रीमती सि. नागमणी,** उपनिर्देशिका, क.प.पु. सङ्घः (रि) बेङ्गलूरु।

**संयोजिका**

**श्रीमती एस्.एन्.लीलावती**, ज्योष्ठसहायकनिर्देशिका, क.प.पु.सङ्घः(रि), बेङ्गलूरु।

©KTBS Not to be republished

# ಸಂಸ್ಕೃತ ಮತ್ತು ಜಾಲಸ್ಥಾನಗಳು

ಸಂಸ್ಕೃತಭಾಷೆಯ ಪ್ರಚಾರ ಮತ್ತು ಪ್ರಸಾರಕಾರ್ಯದಲ್ಲಿ ತೊಡಗಿರುವ ಹಲವಾರು ಸಂಸ್ಥೆಗಳು ಅಂತರ್ಜಾಲದ ಮೂಲಕ ಸಂಸ್ಕೃತಭಾಷೆಯ ಅಧ್ಯಯನಕ್ಕೆ ಸಹಕಾರಿಯಾಗಿವೆ. ಕೆಲವೊಂದು ತಾಣಗಳಲ್ಲಿ ಅಮೂಲ್ಯವಾದ ಗ್ರಂಥಗಳು pdf ರೂಪದಲ್ಲಿ ಲಭ್ಯವಿದೆ.

ಇಲ್ಲಿ ಕೆಲವೊಂದು ಜಾಲಸ್ಥಾನಗಳನ್ನು ಕೊಡಲಾಗಿದೆ. ಜವಹರ್ ಲಾಲ್ ನೆಹರು ವಿಶ್ವವಿದ್ಯಾಲಯದ (JNU) ಸಂಸ್ಕೃತ ಅಧ್ಯಯನ ಕೇಂದ್ರವು 2001 ರಲ್ಲಿ ಆರಂಭವಾಯ್ತು. ಅಂದಿನಿಂದಲೂ ಹಲವಾರು ಕಾರ್ಯವನ್ನು ಮಾಡುತ್ತಾ ಬಂದಿದೆ.ಅದರಲ್ಲಿ ಮುಖ್ಯವಾಗಿ multimedia & e-learning ಮತ್ತು ಸಂಧಿ, ಸುಬಂತ ಮತ್ತು ತಿಙಂತ generator. ಧಾತುಗಳನ್ನು ಅಕಾರಾದಿಯಾಗಿ ಜೋಡಿಸಿದ್ದಾರೆ. ಅದರ ಮೇಲೆ ಕೀಲಿ ಮಣೆಯ ಸಹಾಯದಿಂದ ಒತ್ತಿದಾಗ ಆ ಧಾತುವಿನ ಎಲ್ಲ ಲಕಾರಗಳ ರೂಪಗಳು ಲಭ್ಯವಾಗುತ್ತವೆ... ಇದು ಪ್ರಾತಿಪದಿಕಗಳಿಗೂ ಅನ್ವಯವಾಗುತ್ತದೆ.ಸಂಕೇತ: www.jnu.ac.in (special Centre for Sanskrit studies)

ಸಂಸ್ಕೃತ ಜಗತ್ – ಇದು ಈ–ಪತ್ರಿಕೆ. 38 ಪುಟಗಳ ತ್ರೈಮಾಸಿಕ ಇದಾಗಿದೆ. ಸಂಕೇತ: www.sanskritjagat.com ಇನ್ನೊಂದು ಪ್ರಮುಖ ಜಾಲಸ್ಥಾನ Sanskrit.safire.com ಇಲ್ಲಿ ದೇವೀಮಹಾತ್ಮೆ ಮುಂತಾದ ನೂರಾರು ಪುಸ್ತಕಗಳು pdf ರೂಪದಲ್ಲಿ ಲಭ್ಯವಿದೆ. ವೇದಗಳು ಧ್ವನಿರೂಪದಲ್ಲಿ ಲಭ್ಯವಿದೆ.

Spokensanskrit.de ಇದೊಂದು ಸಂಸ್ಕೃತ–ಇಂಗ್ಲೀಷ್ ಮತ್ತು ಇಂಗ್ಲೀಷ ಕೋಷವಾಗಿದೆ. ಇದನ್ನು online hypertext Sanskrit dictionary ಎಂಬುದಾಗಿ ಹೆಸರಿಸಿದ್ದಾರೆ. ಇಲ್ಲಿ ನಮಗೆ ಬೇಕಾದ ಶಬ್ದಗಳನ್ನು ಉಟ್ಟಂಕನ ಮಾಡಿದಾಗ ಅದು ಆ ಶಬ್ದದ ಅರ್ಥವನ್ನು ಸಂಸ್ಕೃತ/ಇಂಗ್ಲೀಷ್ ಭಾಷೆಯಲ್ಲಿ ನೀಡುವುದು.

http://www.speaksanskrit.org ಇದರ ಮೂಲಕ ಪ್ರಕಟವಾಗುವ ವಿಶ್ವವಾಣೀ ಎಂಬ ಇ–ಪತ್ರಿಕೆ . ನಾಲ್ಕು ಮಾಸಗಳಿಗೊಮ್ಮೆ ಪ್ರಕಾಶಿತವಾಗುತ್ತಿದೆ. ಹಳೆಯ ಸಂಚಿಕೆಗಳು ಲಭ್ಯ. ಇದು ಅಮೆರಿಕಾದಲ್ಲಿ ವಿವಿಧ ವಿಶ್ವವಿದ್ಯಾನಿಲಯಗಳಲ್ಲಿರುವ ಸಂಸ್ಕೃತಪ್ರಿಯ ವಿದ್ಯಾರ್ಥಿಗಳಿಂದ ಪ್ರಕಾಶಿತವಾಗುತ್ತಿದೆ. ಇದರ ಪ್ರಥಮ ಸಂಚಿಕೆ 29ಜೂನ್ 2007ರ ಗುರುಪೂರ್ಣಿಮೆಯಂದು ಲೋಕಾರ್ಪಣವಾಯಿತು.

ಮೈಸೂರಿನಿಂದ ಪ್ರಕಾಶಿತವಾಗುತ್ತಿರುವ ಸುಧರ್ಮಾ ಪತ್ರಿಕೆಯು ಈ –ರೂಪದಲ್ಲಿದೆ, ಅದರ ಸಂಕೇತ http://sudharma.epapertoday.com

ಗುಜರಾತಿನ ವಡೋದರರದಿಂದ ಪ್ರಕಾಶಿತವಾಗುತ್ತಿರುವ ದ್ವಿತೀಯ ದೈನಿಕ. ಸಂಸ್ಕೃತವರ್ತಮಾನ ಪತ್ರಮ್ ಅದರ ಸಂಕೇತ: http://www.sanskritvartmanpatram.com

**ಜಯತು ಸಂಸ್ಕೃತಮ್ ಜಯತು ಮನುಕುಲಮ್**

©KTBS Not to be republished

# गुरूपदेशः

वेदम् अनूच्य आचार्यः अन्तेवासिनम् अनुशास्ति । सत्यं वद । धर्मं चर ।

स्वाध्यायात् मा प्रमदः ।

आचार्याय प्रियं धनम् आहृत्य प्रजातन्तुं माव्यवच्छेत्सीः । सत्यात् न प्रमदितव्यम्।

धर्मात् न प्रमदितव्यम् । कुशलात् न प्रमदितव्यम् । भूत्यै न प्रमदितव्यम् ।

स्वाध्याय- प्रवचनाभ्यां न प्रमदितव्यम् ।

देवपितृकार्याभ्यां न प्रमदितव्यम् ।

मातृदेवो भव । पितृदेवो भव । आचार्यदेवो भव । अतिथिदेवो भव।

यानि अनवद्यानि कर्माणि तानि सेवितव्यानि नो इतराणि।

यानि अस्माकं सुचरितानि तानि त्वया उपास्यानि, नो इतराणि ।

श्रद्धया देयम् । अश्रद्धया अदेयम् । श्रिया देयम्। ह्रिया देयम् ।

भिया देयम् । संविदा देयम् ।

अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात्।

ये तत्र ब्राह्मणाः सम्मर्शिनः । युक्ताः आयुक्ताः।

अलूक्षाः धर्मकामाः स्युः, यथा ते तत्र वर्तेरन् तथा तत्र वर्तेथाः ।

एष आदेशः । एष उपदेशः । एषा वेदोपनिषत्।

एतदनुशासनम् । एवमुपासितव्यम् ।

**- तैत्तिरीयोपनिषत्।**

© KTBS Not to be republished

# पाठानुक्रमणिका


| क्र.सं | | पाठाः | पुठसंख्या |
|---|---|---|---|
| १. | प्रथमः पाठः | शरणं प्रपद्ये (कण्ठपाठः करणीयः) | १ |
| २. | द्वितीयः पाठः | सुबन्तम् | ७ |
| ३. | तृतीयः पाठः | सिद्धारूढभारती | १९ |
| ४. | चतुर्थः पाठः | कृदन्ताव्ययानि | २३ |
| ५. | पञ्चमः पाठः | परोपकारः पुण्याय | २८ |
| ६. | षष्ठः पाठः | तिङन्तम् उपसर्गाश्च | ३४ |
| ७. | सप्तमः पाठः | सन्धिः | ४२ |
| ८. | अष्टमः पाठः | विस्मृतभेदाः सन्तः | ४९ |
| ९. | नवमः पाठः | प्रयोगाः | ५४ |
| १०. | दशमः पाठः | मूर्तिपूजारहस्यम् | ५८ |
| ११. | एकादशः पाठः | समासः | ६४ |
| १२. | द्वादशः पाठः | दीपावलिः | ६९ |
| १३. | त्रयोदशः पाठः | मार्गस्थो नावसीदति (कण्ठपाठः करणीयः) | ७६ |
| १४. | चतुर्दशः पाठः | कारकाणि विशेषव्या-करणांशाश्च | ८२ |
| १५. | पञ्चदशः पाठः | सिद्धिक्षेत्रम् | ८६ |
| १६. | षोडशः पाठः | आत्मविडम्बनम् | ९२ |
| १७. | सप्तदशः पाठः | वेदगणितज्ञः | १०१ |
| १८. | अष्टादशः पाठः | सौभद्रो ग्रहणं गतः | ११० |
| १९. | नवदशः पाठः | अलङ्कारः | १२४ |
| २०. | विंशः पाठः | छन्दः | १२७ |


Not to be republished ©KTBS

| | | | |
|---|---|---|---|
| २१. | एकविंशः पाठः | पत्रलेखनम् | १३१ |
| २२. | द्वाविंशः पाठः | प्रबन्धाः | १३४ |
| २३. | त्रयोविंशः पाठः | अनुवादाः | १३७ |
| | **पूरकपाठाः** | | |
| १. | गतानुगतिको लोकः | | १३९ |
| २. | वृद्धायाः देशप्रेम | | १४० |
| ३. | धर्मो रक्षति रक्षितः | | १४२ |
| | **परिशिष्टम्** | | |
| १. | सेतुपाठः | | १४७ |
| २. | वाक्यरचना कौशलम् (चित्रकथा) | | १४९ |
| ३. | गद्यावगाहनम् | | १५४ |
| ४. | प्रश्नपत्रिकास्वरूपम् | | १५८ |
| ५. | मार्गदर्शिनी प्रश्नपत्रिका | | १६० |
| ६. | पदकोशाः | | १६६ |
| ७. | पाठयोजना | | १७१ |


©KTBS Not to be republished

## प्रथमः पाठः

# शरणं प्रपद्ये

### कण्ठपाठः करणीयः

नमो नमः शर्वसुताय तस्मै
नमो नमो विघ्ननिवारकाय ।
नमो नमः शीघ्रवरप्रदाय
नमो नमः सर्वगणाधिपाय ।। १ ।।





नमस्ते शारदे देवि
काश्मीरपुरवासिनि ।
त्वामहं प्रार्थये नित्यम्
विद्यां बुद्धिं च देहि मे ।। २।।

करारविन्देन पदारविन्दं
मुखारविन्दे विनिवेशयन्तम् ।
वटस्य पत्रस्य पुटे शयानं
बालं मुकुन्दं मनसा स्मरामि ।। ३।।





नमस्तस्मै भगवते अर्हते
सम्यक् सम्बुद्धाय।
बुद्धं शरणं गच्छामि
धर्मं शरणं गच्छामि
सङ्घं शरणं गच्छामि।४।।

© KTBS Not to be republished



नमो अर्हन्तानां
नमः सिद्धानां
नमः आर्याणाम्
नमः उपाध्यायानाम्
नमो लोके सर्वसाधूनाम् ।। ५ ।।

## अन्वयार्थः

१. शर्वसुताय = शिवस्य पुत्राय, तस्मै = गणेशाय, नमो नमः = नमस्कारः, विघ्ननिवारकाय = प्रत्यूहनाशकाय, नमो नमः = नमस्कारः, शीघ्रवरप्रदाय = झटित्येव अनुग्रहदायकाय, नमो नमः = नमस्कारः, सर्वगणाधिपाय = सकलगणाध्यक्षाय, नमो नमः = नमस्कारः ।

२. काश्मीरपुरवासिनि = काश्मीरदेशनिवासिनि, शारदा देवि = भगवति सरस्वति, ते नमः = भवतीं वन्दे । अहं, त्वाम् = भवतीं, नित्यम् = सर्वदा, प्रार्थये = याचे । मे = मम कृते, विद्यां = ज्ञानम्, बुद्धिं = सन्मतिं च देहि = प्रयच्छ

३. करारविन्देन = हस्तकमलेन, पदारविन्दम् = चरणकमलम् मुखारविन्दे = मुखकमले, विनिवेशयन्तम् = स्थापितवन्तम्, वटस्य पत्रस्य पुटे शयानम् = न्यग्रोधपर्णस्य उपरि योगनिद्रां कुर्वन्तम् बालम् = बालकम्, मुकुन्दम् = कृष्णम्, मनसा = चेतसा, स्मरामि = ध्यायामि ।

४. सम्यक् सम्बुद्धाय = समीचीनतया ज्ञानं प्राप्तवते, भगवते = भगवत्स्वरूपाय, तस्मै अर्हते = तस्मै बुद्धाय, नमः = नमस्कारः, बुद्धं शरणं गच्छामि धर्मं शरणं गच्छामि, सङ्घं शरणं गच्छामि।

५. अर्हन्तः = ज्ञानिनः, सर्वसाधवः = सर्वे साधकाः

Not to be republished ©KTBS

## अभ्यासः

**१. एकवाक्येन उत्तरं लिखत ।**

१. शर्वसुतः कः?

२. काश्मीरपुरवासिनी का ?

३. मुकुन्दः कुत्र शयनं करोति ?

४. अर्हन् कः ?

**२. संयोज्य लिखत ।**

| | अ | आ |
|---|---|---|
| १. | गणेशः | काश्मीरपुरवासिनी |
| २. | शारदा | श्रीकृष्णः |
| ३. | मुकुन्दः | शीघ्रवरप्रदः |

**३. वाक्यं रचयत ।**

१. नमः  २. त्वाम्  ३. पुत्रः  ४. वन्दे

**४. चतुर्थं पदं लिखत ।**

१. काश्मीरपुरवासिनी - शारदा , सर्वगणाधिपः__________।

२. करः - हस्तः , मुखम् __________ ।

३. बालम् - द्वितीयाविभक्तिः, वटस्य__________ ।

**५. समानार्थकपदं लिखत ।**

१. विघ्नः  २. इन्दुः  ३. नभः  ४.अरविन्दम्

**६. विरुद्धार्थकपदं लिखत ।**

१. शीघ्रम्  २. धीरः  ३.निन्दा

©KTBS Not to be republished

**८. अन्यलिङ्गपदं लिखत ।**

१. तस्मै २. देवः ३. बालः

**९. समूहेतरपदं लिखत ।**

१. गणाधिपः, विघ्नेश्वरः, महेशः, गणेशः

२. नमस्ते, प्रपद्ये, प्रार्थये, स्मरामि

३. नमः, रामः, बालः, पुत्रः

**१०. रेखाङ्कितपदमाधारीकृत्य प्रश्नवाक्यनिर्माणं कुरुत ।**

१. <u>शीघ्रवरप्रदाय</u> नमो नमः।

२. मुकुन्दं <u>मनसा</u> स्मरामि ।

३. <u>बुद्धं</u> शरणं गच्छामि।

*****

## अवधेयांशः

**१.कोषः -** १. गणाधिपः - विनायको विघ्नराजद्वैमातुरगणाधिपाः ।

२. कृष्णः - विष्णुर्नारायणः कृष्णो वैकुण्ठो विष्टरश्रवाः ।

२.

यल्लिङ्गं यद्वचनं या च विभक्तिः विशेष्यस्य ।
तल्लिङ्गं तद्वचनं सा च विभक्तिः विशेषणस्यापि ।।

©KTBS Not to be republished

**३. पद ( गतौ ) धातोः लट् लकारस्य रूपाणि ।**

| | | |
|---|---|---|
| पद्यते | पद्येते | पद्यन्ते |
| पद्यसे | पद्येथे | पद्यध्वे |
| पद्ये | पद्यावहे | पद्यामहे |

डुदाञ् ( दाने ) इति धातोः लोट् लकाररूपाणि ।

| | | |
|---|---|---|
| ददातु - दत्तात् | दत्ताम् | ददतु |
| देहि - दत्तात् | दत्तम् | दत्त |
| ददानि | ददाव | ददाम |

**४. किम्' इति शब्दः प्रश्नार्थकः । तस्य रूपैः सह चित् - चन योजनेन अनिश्चितार्थकत्वं सिद्ध्यति । यथा वा -**

१. काचित् गायति । (अत्र का गायति इति निश्चयः नास्ति ।)

२. कश्चन अभिनयति । (अत्र कः अभिनयति इति निश्चयः नास्ति ।)

३. बालः केनचित् सह क्रीडति । (अत्र केन सह क्रीडति इति निश्चयः नास्ति।) एतादृशः अर्थः अनिश्चितार्थकः।

## क्रियाकलापः

**१. सूक्तं पदं मञ्जूषातः चित्वा लिखत ।**

काशीनगरे कश्चन [ ] ब्राह्मणः आसीत् । तस्य [ ] पुत्रौ आस्ताम् । सः ज्येष्ठाय [ ] सर्वं धनं दत्तवान्। कनिष्ठं [ ] विद्यार्जनाय गुरुकुलं प्रेषितवान् । ज्येष्ठः पुत्रः [ ] दिवसेषु एव [ ] धनस्य व्ययं कृत्वा दरिद्रोऽभवत्।



©KTBS Not to be republished

[ ] पुत्रेण सम्यक् अध्ययनं कृतम् । सः स्वपाण्डित्येन [ ] धनं सम्पाद्य सुखेन अवसत् । अतः विद्यावान् [ ] सुखं प्राप्नोति ।

| |
|---|
| सर्वस्य, पुत्रम्, द्वौ, पुरुषः, कतिपयेषु , अधिकम्, सर्वविद्यापारङ्गतः, पुत्राय, कनिष्ठेन । |

**२. दत्तमुदाहरणं दृष्ट्वा रिक्तस्थलं पूरयत ।**







©KTBS Not to be republished

## द्वितीयः पाठः

# सुबन्तम्

यस्य अन्ते सुप् प्रत्ययः भवति तत् पदं सुबन्तम् । प्रातिपदिकं सुबन्तस्य मूलं रूपम् । प्रातिपदिकेभ्यः सुप् प्रत्ययाः भवन्ति । एते सुप् प्रत्ययाः सप्तसु विभक्तिषु आहत्य एकविंशतिसंख्याकाः भवन्ति । अत्र केचन सुबन्तशब्दाः प्रदत्ताः।अवश्यं कण्ठपाठः करणीयः ।

**इ कारान्तः पुंलिङ्गः 'पति' शब्दः**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | पतिः | पती | पतयः |
| सं.प्रथमा | हे पते | हे पती | हे पतयः |
| द्वितीया | पतिम् | पती | पतीन् |
| तृतीया | पत्या | पतिभ्याम् | पतिभिः |
| चतुर्थी | पत्ये | पतिभ्याम् | पतिभ्यः |
| पञ्चमी | पत्युः | पतिभ्याम् | पतिभ्यः |
| षष्ठी | पत्युः | पत्योः | पतीनाम् |
| सप्तमी | पत्यौ | पत्योः | पतिषु |

वि.सू. समासान्ते पतिशब्दः 'कवि' शब्दवत् भवति ।

यथा- भूपतिः, नरपतिः, श्रीपतिः ।

**ऋकारान्तः पुंलिङ्गः 'पितृ' शब्दः**

| विभक्तिः | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र.वि. | पिता | पितरौ | पितरः |
| सं.प्र.वि. | हे पितः | हे पितरौ | हे पितरः |

©KTBS Not to be republished

| | | | |
|---|---|---|---|
| द्वि.वि. | पितरम् | पितरौ | पितॄन् |
| तृ.वि. | पित्रा | पितृभ्याम् | पितृभिः |
| च.वि. | पित्रे | पितृभ्याम् | पितृभ्यः |
| पं.वि. | पितुः | पितृभ्याम् | पितृभ्यः |
| ष.वि. | पितुः | पित्रोः | पितॄणाम् |
| स.वि. | पितरि | पित्रोः | पितृषु |

१. एवं मातृशब्दः, दुहितृशब्दः च स्त्रीलिङ्गशब्दौ । अतः द्वितीयाविभक्तिबहुवचने मातॄः दुहितॄः इति रूपं भवति । अन्यत् सर्वं पितृशब्दवत् ।

२. नेतृ, दातृ, गन्तृ इत्यादीनां कृदन्तशब्दानां प्रथमाविभक्तौ द्वितीयाविभक्तौ च अकारस्य दीर्घः अधिकः भवति । उदा- नेता नेतारौ नेतारः । एवमेव स्वसृ शब्दः भवति । किन्तु द्वितीया विभक्तिबहुवचने स्वसॄः इति रूपं भवति ।

- **ई कारान्तः स्त्रीलिङ्गः 'जननी' शब्दः**

| **विभक्तिः** | **ए.व.** | **द्वि.व.** | **ब.व.** |
|---|---|---|---|
| प्र.वि. | जननी | जनन्यौ | जनन्यः |
| सं.प्र.वि. | हे जननि | हे जनन्यौ | हे जनन्यः |
| द्वि.वि. | जननीम् | जनन्यौ | जननीः |
| तृ.वि. | जनन्या | जननीभ्याम् | जननीभिः |
| च.वि. | जनन्यै | जननीभ्याम् | जननीभ्यः |
| पं.वि. | जनन्याः | जननीभ्याम् | जननीभ्यः |
| ष.वि. | जनन्याः | जनन्योः | जननीनाम् |
| स.वि. | जनन्याम् | जनन्योः | जननीषु |

एवमेव गौरी, वाणी, सखी, कुमारी, इत्यादयः शब्दाः ज्ञेयाः ।

©KTBS Not to be republished

● **उकारान्तः नपुंसकलिङ्गः ' मधु' शब्दः**

| विभक्तिः | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र.वि. | मधु | मधुनी | मधूनि |
| सं.प्र.वि. | हे मधो/हे मधु | हे मधुनी | हे मधूनि |
| द्वि.वि. | मधु | मधुनी | मधूनि |
| तृ.वि. | मधुना | मधुभ्यां | मधुभिः |
| च.वि. | मधुने | मधुभ्यां | मधुभ्यः |
| पं.वि. | मधुनः | मधुभ्यां | मधुभ्यः |
| ष.वि. | मधुनः | मधुनोः | मधूनां |
| स.वि. | मधुनि | मधुनोः | मधुषु |

एवमेव - मृदु, स्वादु, दारु, गुरु इत्यादयः।

## हलन्तशब्दाः (व्यञ्जनान्ताः)

**तकारान्तः पुंलिङ्गः 'मरुत्' शब्दः**

| विभक्तिः | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र.वि. | मरुत् | मरुतौ | मरुतः |
| सं.प्र.वि. | हे मरुत् | हे मरुतौ | हे मरुतः |
| द्वि.वि. | मरुतम् | मरुतौ | मरुतः |
| तृ.वि. | मरुता | मरुद्भ्याम् | मरुद्भिः |
| च.वि. | मरुते | मरुद्भ्याम् | मरुद्भ्यः |
| पं.वि. | मरुतः | मरुद्भ्याम् | मरुद्भ्यः |
| ष.वि. | मरुतः | मरुतोः | मरुताम् |
| स.वि. | मरुति | मरुतोः | मरुत्सु |

एवमेव भूभृत्, कर्मकृत्, विश्वजित्, इत्यादयः शब्दाः ज्ञेयाः ।

©KTBS Not to be republished

- **च कारान्तः स्त्रीलिङ्गः 'वाच्' शब्दः**

| विभक्तिः | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र.वि. | वाक् | वाचौ | वाचः |
| सं.प्र.वि. | हे वाक् | हे वाचौ | हे वाचः |
| द्वि.वि. | वाचम् | वाचौ | वाचः |
| तृ.वि. | वाचा | वाग्भ्याम् | वाग्भिः |
| च.वि. | वाचे | वाग्भ्याम् | वाग्भ्यः |
| पं.वि. | वाचः | वाग्भ्याम् | वाग्भ्यः |
| ष.वि. | वाचः | वाचोः | वाचाम् |
| स.वि. | वाचि | वाचोः | वाक्षु |

एवमेव त्वच्, जलमुच्, शब्दाः ज्ञेयाः।

- **त कारान्तः पुंलिङ्गः ' भवत् ' शब्दः (अत् अन्तः)**

| विभक्तिः | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र.वि. | भवान् | भवन्तौ | भवन्तः |
| सं.प्र.वि. | हे भवन् | हे भवन्तौ | हे भवन्तः |
| द्वि.वि. | भवन्तम् | भवन्तौ | भवतः |
| तृ.वि. | भवता | भवद्भ्याम् | भवद्भिः |
| च.वि. | भवते | भवद्भ्याम् | भवद्भ्यः |
| पं.वि. | भवतः | भवद्भ्याम् | भवद्भ्यः |
| ष.वि. | भवतः | भवतोः | भवताम् |
| स.वि. | भवति | भवतोः | भवत्सु |

एवमेव भगवत्, श्रीमत्, धीमत्, धनवत्, रूपवत् इत्यादयः ।

©KTBS Not to be republished

- **ईकारान्तः स्त्रीलिङ्गः ‘भवती’ शब्दः ।**

| विभक्तिः | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र.वि. | भवती | भवत्यौ | भवत्यः |
| सं.प्र.वि. | हे भवति | हे भवत्यौ | हे भवत्यः |
| द्वि.वि. | भवतीम् | भवत्यौ | भवतीः |
| तृ.वि. | भवत्या | भवतीभ्याम् | भवतीभिः |
| च.वि. | भवत्यै | भवतीभ्याम् | भवतीभ्यः |
| पं.वि. | भवत्याः | भवतीभ्याम् | भवतीभ्यः |
| ष.वि. | भवत्याः | भवत्योः | भवतीनाम् |
| स.वि. | भवत्यां | भवत्योः | भवतीषु |

- **नकारान्तः पुंलिङ्गः ‘गुणिन्’ शब्दः ।**

(इन् अन्तः)

| विभक्तिः | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र.वि. | गुणी | गुणिनौ | गुणिनः |
| सं.प्र.वि. | हे गुणिन् | हे गुणिनौ | हे गुणिनः |
| द्वि.वि. | गुणिनम् | गुणिनौ | गुणिनः |
| तृ.वि. | गुणिना | गुणिभ्याम् | गुणिभिः |
| च.वि. | गुणिने | गुणिभ्याम् | गुणिभ्यः |
| पं.वि. | गुणिनः | गुणिभ्याम् | गुणिभ्यः |
| ष.वि. | गुणिनः | गुणिनोः | गुणिनाम् |
| स.वि. | गुणिनि | गुणिनोः | गुणिषु |

एवमेव - योगिन्, विद्यार्थिन्, स्वामिन्, धर्मिन्, न्यायवादिन्, अधिकारिन् इत्यादयः ।

©KTBS Not to be republished

- **नकारान्तः पुंलिङ्गः 'राजन्' शब्दः**

| विभक्तिः | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र.वि. | राजा | राजानौ | राजानः |
| सं.प्र.वि. | हे राजन् | हे राजानौ | हे राजानः |
| द्वि.वि. | राजानम् | राजानौ | राज्ञः |
| तृ.वि. | राज्ञा | राजभ्यां | राजभिः |
| च.वि. | राज्ञे | राजभ्यां | राजभ्यः |
| पं.वि. | राज्ञः | राजभ्यां | राजभ्यः |
| ष.वि. | राज्ञः | राज्ञोः | राज्ञाम् |
| स.वि. | राज्ञि/राजनि | राज्ञोः | राजसु |

- **स कारान्तः पुंलिङ्गः 'विद्वस्' शब्दः**

| विभक्तिः | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र.वि. | विद्वान् | विद्वांसौ | विद्वांसः |
| सं.प्र.वि. | हे विद्वन् | हे विद्वांसौ | हे विद्वांसः |
| द्वि.वि. | विद्वांसम् | विद्वांसौ | विदुषः |
| तृ.वि. | विदुषा | विद्वद्भ्याम् | विद्वद्भिः |
| च.वि. | विदुषे | विद्वद्भ्याम् | विद्वद्भ्यः |
| पं.वि. | विदुषः | विद्वद्भ्याम् | विद्वद्भ्यः |
| ष.वि. | विदुषः | विदुषोः | विदुषाम् |
| स.वि. | विदुषि | विदुषोः | विद्वत्सु |

©KTBS Not to be republished

## ● स कारान्तः नपुंसकलिङ्गः 'मनस्' शब्दः ।

| विभक्तिः | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र.वि. | मनः | मनसी | मनांसि |
| सं.प्र.वि. | हे मनः | हे मनसी | हे मनांसि |
| द्वि.वि. | मनः | मनसी | मनांसि |
| तृ.वि. | मनसा | मनोभ्याम् | मनोभिः |
| च.वि. | मनसे | मनोभ्याम् | मनोभ्यः |
| पं.वि. | मनसः | मनोभ्याम् | मनोभ्यः |
| ष.वि. | मनसः | मनसोः | मनसाम् |
| स.वि. | मनसि | मनसोः | मनस्सु |

एवमेव- तमस्, तेजस्, तपस्, वयस्, यशस्, इत्यादयः ।

## द कारान्तः पुंलिङ्गः एतद् शब्दः। तत् शब्दं अनुकरोति

| विभक्तिः | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्रथमा | एषः | एतौ | एते |
| द्वितीया | एतम्/एनम् | एतौ/एनौ | एतान्/एनान् |
| तृतीया | एतेन/एनेन | एताभ्याम् | एतैः |
| चतुर्थी | एतस्मै | एताभ्याम् | एतेभ्यः |
| पञ्चमी | एतस्मात् | एताभ्याम् | एतेभ्यः |
| षष्ठी | एतस्य | एतयोः/एनयोः | एतेषाम् |
| सप्तमी | एतस्मिन् | एतयोः/एनयोः | एतेषु |

©KTBS Not to be republished

**द कारान्तः स्त्रीलिङ्गः एतद् शब्दः।**

| विभक्तिः | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्रथमा | एषा | एते | एताः |
| द्वितीया | एताम्/एनाम् | एते/एने | एताः/एनाः |
| तृतीया | एतया/एनया | एताभ्याम् | एताभिः |
| चतुर्थी | एतस्यै | एताभ्याम् | एताभ्यः |
| पञ्चमी | एतस्याः | एताभ्याम् | एताभ्यः |
| षष्ठी | एतस्याः | एतयोः/एनयोः | एतासाम् |
| सप्तमी | एतस्याम् | एतयोः/एनयोः | एतासु |

**द कारान्तः नपुंसकलिङ्गः 'एतद्' शब्दः।**

| विभक्तिः | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्रथमा | एतत् | एते | एतानि |
| द्वितीया | एतत् | एते | एतानि |
| तृतीया | एतेन/एनेन | एताभ्याम् | एतैः |
| चतुर्थी | एतस्मै | एताभ्याम् | एतेभ्यः |
| पञ्चमी | एतस्मात् | एताभ्याम् | एतेभ्यः |
| षष्ठी | एतस्य | एतयोः/एनयोः | एतेषाम् |
| सप्तमी | एतस्मिन् | एतयोः/एनयोः | एतेषु |

©KTBS Not to be republished

अ कारान्त:पुंलिङ्गः 'सर्व' शब्दः । (विशेषशब्दः)

| विभक्तिः | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र.वि. | सर्वः | सर्वौ | सर्वे |
| सं.प्र.वि. | हे सर्व | हे सर्वौ | हे सर्वे |
| द्वि.वि. | सर्वम् | सर्वौ | सर्वान् |
| तृ.वि. | सर्वेण | सर्वाभ्याम् | सर्वैः |
| च.वि. | सर्वस्मै | सर्वाभ्याम् | सर्वेभ्यः |
| पं.वि. | सर्वस्मात् | सर्वाभ्याम् | सर्वेभ्यः |
| ष.वि. | सर्वस्य | सर्वयोः | सर्वेषाम् |
| स.वि. | सर्वस्मिन् | सर्वयोः | सर्वेषु |

- आ कारान्तः स्त्रीलिङ्गः 'सर्वा' शब्दः

| विभक्तिः | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र.वि. | सर्वा | सर्वे | सर्वाः |
| सं.प्र.वि. | हे सर्वे | हे सर्वे | हे सर्वाः |
| द्वि.वि. | सर्वाम् | सर्वे | सर्वाः |
| तृ.वि. | सर्वया | सर्वाभ्याम् | सर्वाभिः |
| च.वि. | सर्वस्यै | सर्वाभ्याम् | सर्वाभ्यः |
| पं.वि. | सर्वस्याः | सर्वाभ्याम् | सर्वाभ्यः |
| ष.वि. | सर्वस्याः | सर्वयोः | सर्वासाम् |
| स.वि. | सर्वस्याम् | सर्वयोः | सर्वासु |

©KTBS Not to be republished

**अ कारान्तः नपुंसकलिङ्गः 'सर्व' शब्दः ।**

| विभक्तिः | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र.वि. | सर्वम् | सर्वे | सर्वाणि |
| सं.प्र.वि. | हे सर्व | हे सर्वे | हे सर्वाणि |
| द्वि.वि. | सर्वम् | सर्वे | सर्वाणि |
| तृ.वि. | सर्वेण | सर्वाभ्याम् | सर्वैः |
| च.वि. | सर्वस्मै | सर्वाभ्याम् | सर्वेभ्यः |
| पं.वि. | सर्वस्मात् | सर्वाभ्याम् | सर्वेभ्यः |
| ष.वि. | सर्वस्य | सर्वयोः | सर्वेषाम् |
| स.वि. | सर्वस्मिन् | सर्वयोः | सर्वेषु |

## अवधेयांशः

**अत्र जननी शब्दम् उपयुज्य वाक्यानि प्रदत्तानि । विभक्तिक्रमेण वाक्यानां योजनं कुरुत ।**

१. जनन्या सह पुत्री गच्छति ।
२. जनन्यां विश्वासः अस्ति ।
३. हे जननि ! मां रक्ष ।
४. पुत्री जनन्याः न बिभेति ।
५. जननी पुत्रीं पृच्छति ।
६. जनन्याः वचनं पुत्री शृणोति।
७. पुत्री जननीं नमति ।
८. जनन्यै वस्त्रं ददाति ।

**रामो** राजमणिः सदा विजयते **रामं** रमेशं भजे
**रामेणा**भिहता निशाचरचमू **रामाय** तस्मै नमः ।
**रामान्ना**स्ति परायणं परतरं **रामस्य** दासोऽस्म्यहं
**रामे** चित्तलयः सदा भवतु मे **भो राम** मामुद्धर ।।

©KTBS Not to be republished

१. रकार-नकारौ अथवा षकार-नकारौ समानपदे भवतः चेत् रकार-षकाराभ्यां परस्य नकारः णकारः भवति । यथा वा -

१. चतुर्णाम् = चतुर् + नाम्        २.पूष्णा = पूष् + ना

२. समानपदे विद्यमानयोः रकार-नकारयोः षकार-नकारयोः वा मध्ये स्वराःयरलवाः कवर्गाः पवर्गाः एते वर्णाः भवन्ति चेत् नकारस्य णकारः भवति । यथा -

रामाणाम्, गुरुणा,

३. समासे कृते समस्तपदं संज्ञा भवति चेत् पूर्वपदस्थ रकारषकाराभ्यां परस्य नकारस्य णकारः भवति । यथा वा - शूर्पणखी, खरणासः

४. निमित्ते सत्यपि पदान्तस्य नकारस्य णकारः न भवति । यथा वा - रामान् ।

**उदाहरणानुसारं लिखत।**     यथा वा - पुरुषेण (✓)   (✓/✗)

१. भीषनः (        )     २. आकर्षणम् (        )

३. परिनामः (        )     ४. किरनः (     )

५. श्रवणम् (        )     ६. गच्छन् (     )

## क्रियाकलापः

- **सूक्तं पदं मञ्जूषातः चित्वा लिखत ।**

पुरा अमरशक्तिः नाम .................. (राजन्- प्रथमा,वि) आसीत् । तस्य .................. (राजन् षष्ठी,वि) पुत्राः .................. (अज्ञानिन्- प्रथमा,वि) आसन् । एतेन नितरां चिन्तितस्य तस्य राज्ञः समीपमागतेन .................. (मन्त्रिन्-तृतीया,वि) कश्चनोपायः कथितः । तदनुसारं राजा घोषकद्वारा घोषणं कारितवान् यत् यः कोऽपि मदीयान् मूर्खान् पुत्रान् ..................

©KTBS Not to be republished

(विद्वस्-द्वितीया,वि) करोति तस्मै अर्धराज्यं दीयते इति । एतत् श्रुवा विष्णुशर्मा नाम ..................(विद्वस्-प्रथमा,वि) .................. (मनस्-सप्तमी,वि) एवम् अचिन्तयत् एतान् राजपुत्रान् शास्त्रेषु कुशलिनः करिष्यामि इति । सः अमरशक्तेः आस्थानमागत्य .................. (राजन्-द्वितीया,वि) एवम् अवदत्- भोः .................. (राजन्- सं.प्रथमा, .................. (भवत्-तृतीया,वि) अनुमतिः दीयते तर्हि तव पुत्रान् षण्मासाभ्यन्तरे एव राजनीतिनिपुणान् करिष्यामि इति । यदा राज्ञा तथैवास्त्विवति अनुमतिर्दत्ता तदा सः चतुरः .................. (विष्णुशर्मन्-प्रथमा,वि) .................. (प्रणिन् - षष्ठी,वि) .................. (पक्षिन् षष्ठी,वि) कथाद्वारा राजपुत्रान् पण्डितान् अकरोत्।

**रिक्तस्थाने मञ्जूषायां स्थितं समुचितं वर्णं संयोज्य पदबन्धं कुरुत ।**

| | | | | |
|---|---|---|---|---|
| १. | | र | मा | ता |
| २. | स | | व | ती |
| ३. | प | | य | नम् |
| ४. | र | णा | | णम् |
| ५. | सि | न्धु | रा | |

| | | | | |
|---|---|---|---|---|
| ङ्ग | त्य | वी | जः | ला |

*****

©KTBS Not to be republished

# तृतीयः पाठः

## सिद्धारूढभारती



नवदशशतके भारतदेशे अनेके महापुरुषाः आसन् तेषु अन्यतमः सिद्धारूढभारती। एषः कर्णाटकस्य श्रेष्ठः दार्शनिकः, स्वातन्त्र्यनेता, समाजसुधारकश्च ।

बीदर् मण्डले चलकापूरम् इति लघुग्रामः अस्ति। तत्र १८३६ तमस्य वर्षस्य मार्च् मासस्य १६ तमे दिनाङ्के शनिवासरे श्रीरामनवमी दिने सिद्धप्पस्य जन्म अभवत्। एषः गुरुशान्तप्पदेवमल्लम्मदम्पत्योः तृतीयः पुत्रः । अयं बाल्ये एव अनेकाः लीलाः अदर्शयत् । शालायां प्रथमे दिने 'ओम्' कारस्य अर्थम् अबोधयत्। आत्मविद्यासम्पादनाय अष्टमे वयसि गृहं त्यक्त्वा गुरुशोधनम् अकरोत्। अमरगुण्डस्य कट्टीमठस्य श्रीगजदण्डस्वामिनं दृष्ट्वा तस्य शिष्यः अभवत् ।

एकदा सुरपूरस्य आस्थानविद्वान् सुब्बाशास्त्री गजदण्डस्वामिनः समीपम् अगच्छत्। वेदोपनिषदध्ययने ब्राह्मणानामेव अधिकारः इत्यभिप्रायम् अमण्डयत्। तदा सिद्धः जातिवादम् अखण्डयत् । ज्ञाने सर्वेषामपि अधिकारः अस्तीति प्रत्यपादयत्। गजदण्डस्वामी सिद्धाय संन्यासदीक्षां दत्त्वा 'सिद्धारूढभारती' इति नामकरणमकरोत्।

सिद्धारूढभारती विंशतिवर्षपर्यन्तम् अखण्डं भारतं पद्भ्यां सञ्चरितवान्। पण्डितान् पामरान् उद्धृतवान्। चत्वारिंशत्तमे वयसि हुब्बल्लिनगरं प्राप्नोत्। डुमगेरि नामके स्थले वासम् अकरोत्। तच्च स्थलं कण्टकाद्यावृतं श्मशानस्थानं च आसीत्। सिद्धारूढस्य व्यक्तित्त्वेन जनाः आकर्षिताः। तत्र सिद्धारूढमठः निर्मितः जातिमतधर्मभाषाभेदं विना देशस्य नानाभागेभ्यः आढ्याः सामान्याश्च सागरः इव सन्निहिता : अभवन् । दीनदलिताः राजमहाराजाः सर्वे जनाः सिद्धारूढस्य भक्ताः अभवन् ।

©KTBS Not to be republished

उपनिषदादिसंस्कृतग्रन्थान् विचारसागरादि हिन्दीग्रन्थान् निजगुणशिवयोगिनः कैवल्यपद्धतिः इत्यादिकन्नडग्रन्थान् च अधिकृत्य श्रीसिद्धारूढभारती प्रवचनं करोति स्म। अनेके साधवः साधकाः सन्यासिनश्च सिद्धारूढस्य निकटे वसन्ति स्म। हैदराबाद् निजामस्य सम्बन्धी सय्यद् अमीन् सिद्धारूढस्य शिष्यः आसीत्। तस्मै संन्यासदीक्षां दत्त्वा कबीरदासः इति नामकरणम् अकरोत्। अक्कलकोटेशरणप्पः शिवपुत्रस्वामी इत्यादयः सिद्धारूढस्य शिष्योत्तमाः। शिरडिसाईबाबा, शिशुनाळशरीफः इत्यादयः सिद्धारूढस्य निकटसम्पर्के आसन्।

हुब्बल्लिनगरे प्रवृत्ते स्वातन्त्र्ययोधानाम् एकस्मिन् समावेशे १९१८ तमे वर्षे बालगङ्गाधरतिलक् महोदयः भागं गृहीतवान्। अन्यस्मिन् समावेशे १९२४ तमे वर्षे महात्मा गन्धी भागं स्वीकृतावान् । सिद्धारूढभारती उभयोः समावेशयोः अध्यक्षस्थानम् अलङ्कृत्य देशभक्तिविषये उद्बोधकं भाषणम् अकरोत्। तिलक् महोदयः स्वस्य कर्मयोगरहस्य इति ग्रन्थस्य विषये सिद्धारूढेन सह चर्चितवान् ।

शिष्यं गुरुनाथारूढम् उत्तराधिकारिणं कृत्वा सिद्धारूढभारती २१.८.१९२९ तमे दिने देहं त्यक्तवान् । तद्दिनादारभ्य अद्यपर्यन्तं सिद्धारूढमठे 'ॐ नमःशिवाय' इति मन्त्रस्य बहिरंगजपः निरन्तरम् अहर्निशं च प्रवर्तते । शिवरात्रौ महारथोत्सवः, रामनवम्यां जन्मोत्सवः, कार्त्तिकमासे दीपोत्सवः च आचर्यते।

उच्चः नीचः इति वर्गभेदः नास्ति, मानवकुलमेकमेव, परामात्मा एकः । जीवनम् अशाश्वतम् । अतः जीवनं प्रामाणिकं, त्यागमयं, विनम्रं च स्यात् । अज्ञानं दुःखकारणम् । ज्ञानमेव सुखसाधनम् इति सिद्धारूढस्य उपदेशसारः। हुब्बल्लिनगरे सिद्धारूढमठः प्रतिदिनं सहस्राधिकान् भक्तान् आकर्षयति । कर्णाटके, महाराष्ट्रे, गोवायाम्, आन्ध्रादिषु प्रदेशेषु पञ्चशताधिकाः सिद्धारूढमठाः सन्ति । अत्र जात्यतीतसमानसिद्धान्तः प्रसार्यते ।

सिद्धारूढनमस्तेऽस्तु स्थितप्रज्ञाय ते नमः ।
ज्ञानाय ज्ञानसिद्धाय ज्ञानगम्याय ते नमः ।।

©KTBS Not to be republished

## अभ्यासः

**१. एकवाक्येन उत्तरं लिखत ।**

१. सिद्धप्पस्य पितुःनाम किम् ?

२. सिद्धारूढस्य गुरुः कः

३. ज्ञाने केषाम् अधिकारः अस्ति ?

४. कैवल्यपद्धतिः कस्य ग्रन्थः ?

**२. इतरवचनद्वयं लिखत ।**

१. .................... .................... अनेके ।

२. वर्षस्य .................... ....................।

३. सिद्धाय.................... .................... ।

४. .................... .................... ग्रन्थान्।

**३. समानार्थकपदं लिखत।**

१. नगरम् २. सागरः ३. देहः ४. ग्रन्थः

**४. विरुद्धार्थकपदं लिखत ।**

१. ग्रामः २. एकः ३. आढ्याः ४. उच्चैः

**५. दशवाक्यैः संस्कृतभाषया, कर्णाटकभाषया, आङ्ग्लभाषया वा उत्तरं लिखत।**

१. स्वातन्त्र्यसङ्ग्रामे सिद्धारूढस्य पात्रं किम् ?

२. सिद्धारूढस्य उपदेशसारः कः ?

©KTBS Not to be republished

## क्रियाकलापः

**१. मञ्जूषातः सूक्तं पदं चित्वा गद्यभागं पूरयत ।**

(मजूषा- वानराः, वानरान्, वानराणां, च, आसन्, भव, धाव, वानराय, नरः, भवन्तः, ज्ञान-चक्षुषी,)

एकदा एकः.............. सरोवरतटे अभ्रमत् । सः गम्भीरचिन्तने रतः आसीत्। सहसा..............शब्दैः तस्य ध्यानभङ्गः अभवत् । सः अपश्यत् यद् रक्तवर्णाः भयङ्कराः वानराः नातिदूरे .............. । सः धावितुम् आरभत । तं धावन्तं दृष्ट्वा.............. अपि अनुधावितवन्तः । भीतः सः तीव्रगत्या धावितुम् आरभत । ''मा..............भयं त्यक्त्वा स्थिरः..............'' इति कस्यचित् वृद्धजनस्य उच्चस्वरं श्रुत्वा सः तथैव अकरोत् । तं स्थितं दृष्ट्वा वानराः अपि तत्रैव स्थितवन्तः । साहसं कृत्वा निर्भीकदृष्ट्या सः.............. अपश्यत् । तं निर्भीकं दृष्ट्वा वानरसमूहः पलायितः । अहो ! आश्चर्यम् । कीदृशः चमत्कारः । अनेन अनुभवेन तस्य.............. उन्मीलिते । तेन ज्ञातं यत् आपत्तिभ्यः मुक्तिः पलायनेन न भवति । किं.............. जानन्ति एषः नरः कः आसीत् ? स एव स्वामीविवेकानन्दः ।

**रथस्यैकं चक्रं भुजगयमिताः सप्ततुरगाः**
**निरालम्बो मार्गश्चरणरहितः सारथिरपि ।**
**रविर्गच्छत्यन्तं प्रतिदिनमपारस्य नभसः**
**क्रियासिध्दिः सत्त्वे भवति महतां नोपकरणे ।।**

*****

Not to be republished ©KTBS

## चतुर्थः पाठः

# कृदन्ताव्ययानि

संस्कृतभाषायां विद्यमानाः शब्दाः सुबन्ताः तिङन्ताः च इति प्रधानरूपेण द्विधा विभक्ताः । सुबन्तस्तु पुंलिङ्गस्त्रीलिङ्गनपुंसकलिङ्गरूपेण त्रिप्रकारकः भवति । अव्ययानां सर्वत्र समानरूपत्वात् निपातम् इत्यपि नामास्ति । अव्ययेषु कृदन्ताव्ययानि अपि अन्तर्भवन्ति । तेषु क्त्वान्तं, तुमुन्नन्तं, ल्यबन्तम् इति प्रमुखानि भवन्ति ।

तिङ् प्रत्ययान् विहाय धातुभ्यः विधीयमानाः सर्वे प्रत्ययाः कृत् प्रत्ययाः इति कथ्यन्ते ।

तेषु कृदन्तेषु कानिचन विशेषणानि कानिचन अव्ययानि भवन्ति । तेषु कृत्प्रत्ययेषु क्त्वा ल्यप्-तुमुन्-प्रत्ययाः अन्यतमाः ।

**I. क्त्वा(त्वा) प्रत्ययः** - क्त्वान्ताव्ययम्-

द्वयोः क्रिययोः समाने कर्तृकत्वे पूर्वतनक्रियावाचकधातोः क्त्वा(त्वा) प्रत्ययः भवति ।

**यथा**

गम् + क्त्वा  गत्वा । गोपालः गृहं गत्वा पठति ।

पा + क्त्वा  पीत्वा । अहं क्षीरं पीत्वा क्रीडामि ।

स्ना +क्त्वा  स्नात्वा । केशवः स्नात्वा भोजनं करोति ।

दा + क्त्वा = दत्त्वा। हे मित्र, पुस्तकमिदं दत्त्वा आगच्छ ।

भू + क्त्वा  भूत्वा । अहं वैद्यो भूत्वा जनसेवां करिष्यामि ।

एवं  पठित्वा, अटित्वा, अर्चित्वा, कथयित्वा, क्रीडित्वा, कृत्वा, दृष्ट्वा, उक्त्वा, ज्ञात्वा, जित्वा, नीत्वा, नत्वा, धृत्वा, लब्ध्वा, इत्यादयः ।

©KTBS Not to be republished

**II. ल्यप्प्रत्ययः-** ल्यबन्ताव्ययम्-

यदा धातोः पूर्वम् उपसर्गः भवति तदा क्त्वा प्रत्ययस्य स्थाने तस्मिन्नेवार्थे ल्यपः (य) आदेशः भवति ।

यथाः- पा- पीत्वा  नि + पा →  निपीय ।

उदाः-  छात्रः क्षीरं निपीय शालां गच्छति ।

भू भूत्वा,  अनु + भू → अनुभूय

उदाः-  गृहस्थः संसारसुखमनुभूय सन्तुष्टः भवति ।

गम् गत्वा,  आ + गम् → आगत्य

उदा :-  अर्चकः देवालयम् आगत्य पूजां करोति ।

स्मृ - स्मृत्वा, वि + स्मृ → विस्मृत्य

उदा :-  रमेशः पुस्तकं विस्मृत्य शालाम् आगतवान् ।

**III. तुमुन् प्रत्ययः -** तुमुन्नन्ताव्ययम् - धातोः तुमुन् प्रत्यययोगेन तुमुन्नन्ताव्ययानि सिध्यन्ति। क्रियामेकामुद्दिश्य क्रियान्तरं यदा उच्यते तदा उद्दिष्टक्रियावाचकधातोः तुमुन् प्रत्ययः विधीयते । यथा-  कृ + तुमुन् → कर्तुम्

उदाः- यूयं सर्वे कार्यं कर्तुं गच्छत ।

नी + तुमुन् → नेतुम्

उदाः- सः पुस्तकं नेतुम् इदानीं गृहम् अगच्छत् ।

गम् + तुमुन् → गन्तुम् ।

उदाः- अहं काशीक्षेत्रं गन्तुम् इच्छामि ।

भू + तुमुन् → भवितुम् ।

उदाः- मम मित्रम् अध्यापकः भवितुम् इच्छति ।

गण् + तुमुन् → गणयितुम् ।

उदाः- धनिकः धनं गणयितुं प्रारभते ।

©KTBS Not to be republished

## अभ्यासः

**१. अत्र एतेषां प्रत्ययनाम लिखत ।**

गत्वा, अनुभूय, ज्ञात्वा, भवितुम्, नेतुम्, निपीय, कर्तुम्, आगत्य, निक्षिप्य, कृत्वा, निधाय, लेखितुम् ।

**२. संयोज्य लिखत ।**

| अ | आ |
|---|---|
| दत्त्वा | ल्यबन्ताव्ययम् |
| विलिख्य | तुमुन्नन्ताव्ययम् |
| परिवर्तितुं | क्त्वान्ताव्ययम् |

**३. समूहेतरं पदं लिखत ।**

| | | | |
|---|---|---|---|
| १. वनाय, | पाठाय, | सीतायै, | अनुभूय. |
| २. गत्वा, | कर्तुम्, | भूत्वा, | पीत्वा. |
| ३. नेतुम्, | गन्तुम्, | गणयितुम्, | ज्ञात्वा. |
| ४. निधाय, | गजाय, | रामाय, | हरये. |

**४. चतुर्थं पदं लिखत ।**

१. स्ना - स्नात्वा :: गण् - ................

२. गम् - गत्वा :: क्रीड् - ................

३. कृ - कर्तुम् :: नी - ................

४. निपीय - ल्यबन्ताव्ययम् :: दत्त्वा - ................

******

©KTBS
Not to be republished

## क्रियाकलापः

**१. उदाहरणानुसारं तुमुन् प्रत्ययं प्रयुज्य वाक्यानि रचयत ।**

उदा १. भक्तः देवालयं गच्छति । भक्तः देवं पूजयति ।

भक्तः देवं पूजयितुं देवालयं गच्छति ।

२. राजेशः देवालयं गच्छति । कृष्णं पश्यति ।

राजेशः कृष्णं द्रष्टुम् देवालयं गच्छति ।

१) बालिका शालां गच्छति । पाठं पठति ।

उत्तरम् ______________________________

२) बालकः चित्रमन्दिरं गच्छति । चित्रं पश्यति ।

उत्तरम् ______________________________

३) अहं लेखनीम् आनयामि । पाठं लिखामि ।

उत्तरम् ______________________________

**२. मञ्जूषायां प्रदत्तं पदम् उपयुज्य वाक्यानि रचयत ।**

(मञ्जूषा - गत्वा, दृष्ट्वा, नीत्वा, लिखित्वा, श्रुत्वा, त्यक्त्वा)

उदा १) बालकः शालां गत्वा पठति ।

१.

२.

३.

४.

५.

©KTBS Not to be republished

## ३. उदाहरणानुसारं वाक्यानि रचयत ।

उदा:- रामः शालां गच्छति । पाठं पठति ।

१) रामः शालां गत्वा पठति ।

२) रामः पाठं पठितुं शालां गच्छति ।

१) पिता आपणं गच्छति । फलानि आनयति ।

१) ______________________

२) ______________________

२) छात्रः क्रीडाङ्गणं गच्छति । क्रीडां क्रीडति ।

१) ______________________

२) ______________________

३) अग्रजः कार्यालयं गच्छति । कार्यं करोति ।

१) ______________________

२) ______________________

४) छात्राः ग्रन्थालयं गच्छन्ति । पुस्तकं पठन्ति ।

१) ______________________

२) ______________________

**हसितुं भ्रमितुं द्रष्टुम् खेलितुं खादितुं तथा ।**
**कथां श्रोतुं च स्वप्तुं च रोचते शैशवे सदा ।।**

©KTBS Not to be republished

पञ्चमः पाठः

# परोपकारः पुण्याय



©KTBS Not to be republished

जातु कश्चित् ब्राह्मणः पत्न्या सह नदीम् उत्तितीर्षुः नदीम् अवगाह्य महापूरेण नीयमानो हाहाकारं कुर्वन् नदीतटे पुराणश्रवणतत्परान् महाजनान् उद्दिश्यैवम् अवदत्- भोः भोः महाजनाः त्रायध्वम् । यः कोऽपि धार्मिको मह्यं सभार्याय प्राणान् ददातु इति । एवं प्रार्थयमानस्य तस्य दीनध्वनिं श्रुत्वा सर्वेऽपि जनाः सदयमपश्यन् । प्रवाहात् तं कूलमानेतुं कोऽपि न शशाक । ततो विक्रमो राजा अभयमुक्त्वा, नदीमध्यं प्रविश्य पत्न्या सह तं ब्राह्मणं महापूरादाकृष्य तटमानिनाय।

ततो ब्राह्मणोऽपि स्वस्थः सन् राजानमवदत् - भोः महापुरुष, ममैतच्छरीरं पुरा पितृभ्याम् अजायत । ततोऽस्य शरीरस्य गायत्र्या द्वितीयं जन्म । इदानीं भवतस्तृतीयं जन्म प्राप्तम् । अतः प्राणदानात् महोपकारिणः तव अहं किमुपकरिष्यामि? नो चेत् मम जीवितं मुधैव स्यात् । अतो यथाशक्त्युपकरोमि

प्रतिगृहाण । गोदावर्युदकमध्ये द्वादशवर्षाणि नामत्रयमन्त्रमजपम् । तत्पुण्यं तुभ्यं दीयते इत्युक्त्वा राज्ञे तत्समग्रं पुण्यं समर्प्याशिषं प्रयुज्य, पत्न्या सह ब्राह्मणो निजस्थानं जगाम ।

अस्मिन्नेव समये भीषणः कोऽपि ब्रह्मराक्षसो राजसमीपमाजगाम । राजा तं दृष्ट्वाऽपृच्छत् - भोः महापुरुष, कस्त्वम्? कुतः समागतोऽसि? इति । ब्रह्मराक्षसः प्रत्यवदत् - अहं पूर्वस्मिन् जन्मनि कश्चित् ब्राह्मणः आसम् । तदा विद्यागर्वाद् वृद्धान् अदूषयम् । तत् पापवशाद् अस्मिन्नश्वत्थपादपे ब्रह्मराक्षसो भूत्वा बहुवर्षाणि तिष्ठामि । अद्य भवतोरुभयोर्गोष्ठीमाकर्ण्य समागतोऽस्मि । यतो निर्विशेषं सर्वेषाम् उपकरोषि, तन्माम् अपि उपकर्तुमर्हसि इति ।

राक्षसः- इदानीं ब्राह्मणेन यत्पुण्यं तुभ्यं दत्तं, तन्मह्यं दीयताम् । तेन पुण्येनाहम् अस्माद्दोषाद् उत्तीर्णो भविष्यामि इति तत्पुण्यमयाचत ।

राजा तत्पुण्यं निर्विशङ्कं ददौ । सोऽपि तेन पुण्येन तस्मात्पापकर्मणो मुक्तो दिव्यरूपधरः सन् राजानं प्रशंस्य दिवं जगाम । राजापि तत्रत्यान् जनान् आपृच्छ्य स्वनगरम् अगमत् । अतः सर्वैरपि परोपकारिभिः भाव्यम् । तथा चोच्यते -

श्रूयतां धर्मसर्वस्वं यदुक्तं ग्रन्थकोटिषु ।
परोपकारः पुण्याय पापाय परपीडनम् ।।
अनित्यानि शरीराणि विभवो नैव शाश्वतः ।
नित्यं संनिहितो मृत्युः कर्तव्यो धर्मसंग्रहः ।।

इयं कथा एस्.वेङ्कटरमणशास्त्रिमहाभागेन सम्पादितात् विक्रमार्कचरितात् स्वीकृता। अस्य कथासङ्ग्रहस्य रचनाकारविषये, स्पष्टाभिप्रायः नास्ति। अस्य द्वात्रिंशत्पुत्थलिका इति नामान्तरमस्ति ।

यदा राजा भोजः विक्रमस्य सिंहासनमारोढुम् इच्छति तदा सिंहासनं वहन्त्यः द्वात्रिंशत् पुत्थलिकाः एकैकशः विक्रमस्य सद्गुणान् प्रत्येककथारूपेण वर्णयित्वा, एवं विधाः सद्गुणाः त्वयि विद्यन्ते तर्हि अस्मिन् सिंहासने उपविश इति कथयन्ति। तच्छ्रुत्वा भोजः तूष्णीं तिष्ठति । तासु द्वात्रिंशत् कथासु इयं कथा अन्यतमा।

©KTBS Not to be republished

## अभ्यासः

**१. एकवाक्येन उत्तरं लिखत ।**

१. प्रवाहात् ब्राह्मणं कोऽरक्षत्?

२. ब्राह्मणः राज्ञे किं समर्पितवान्?

३. कः राज्ञः समीपमाजगाम?

४. पापकर्मणः मुक्तः ब्रह्मराक्षसः कथं दिवं जगाम?

५. अनित्यानि कानि?

**२. रिक्तस्थानं पूरयत ।**

१. ________________ सह ब्राह्मणो निजस्थानं जगाम ।

२. अहं ________________ गर्वाद् वृद्धान् अदूषयम् ।

३. परोपकारः ________________ भवति ।

४. पापाय ________________ ।

५. राजा तत्पुण्यं निर्विशङ्कं ________________ ।

**३. सम्यक् योजयत ।**

| अ | आ |
|---|---|
| विभवो | धर्मसङ्ग्रहः |
| कर्तव्यो | द्वात्रिंशत् पुत्थलिका |
| विक्रमार्कचरितम् | तृतीयजन्म |
| गायत्र्या | नैव शाश्वतः |
| | द्वितीयजन्म |

©KTBS Not to be republished

**४. रेखाङ्कितपदानि आधारीकृत्य प्रश्ननिर्माणं कुरुत ।**

१. द्वात्रिंशत् पुत्थलिकाः सन्ति । २. राजा सिंहासने उपविशति ।

३. भोजः तूष्णीं तिष्ठति । ४. ब्राह्मणः पुत्रेण सह आगच्छति।

**५. वाक्यदोषं परिहरत ।**

१. अहं अत्रैव नगरे कश्चन ब्राह्मणः आसीत् ।

२. सर्वेऽपि जनः सदयम् अपश्यन् ।

३. राजाऽपि तत्रत्यान् जनान् अपृच्छन् ।

४. पत्नीं सह ब्राह्मणः निजस्थानं जगाम ।

**६. योग्यरूपाणि पूरयत ।**

१. ____________ (नदी) जले मम ____________ (पितृ) स्नाति।

२. न ____________ (गायत्री) परो मन्त्रः ____________ (अस्) ।

३. ________ (राजन्) सभायां ________ (राज्ञी) समीपे न उपविशन्ति।

४. बालाः, ________ (युष्मद्) महापूरे स्नातुं मा ________ (गम्-लोट्)

**७. पर्यायपदं लिखत।**

१. भार्या २. राजा ३. पादपः ४. शरीरम्

**८. यथा निर्देशं लिखत।**

१. भोः महापुरुष, मम एतत् शरीरं पुरा पितृभ्याम् अजायत।

कः पाठः? सः महापुरुषः कः? कस्य शरीरं पितृभ्याम् अजायत?

२. विद्यागर्वात् वृद्धान् अदूषयम्?

कः पाठः? कः अदूषयत्? कदा अदूषयत्?

©KTBS Not to be republished

**९. लघूत्तरं लिखत ।**

१. स्वस्थः ब्राह्मणः राजानं प्रति किमब्रवीत्?

२. ब्रह्मराक्षसः कथं शापविमुक्तः अभवत्?

**१०. दशवाक्यैः उत्तरं संस्कृतभाषया, कन्नडभाषया, आङ्ग्लभाषया वा लिखत।**

१. विक्रमादित्यस्य परोपकारं विवृणुत ।

## क्रियाकलापः

**१. लकारानुगुणं क्रियापदानां वर्गीकरणं कुरुत ।**

अपठः, तिष्ठसि, पास्ये, रमै, त्यजति, आसन्,
सेवध्वे, पठाम, गमिष्यति, अहसाम, वसत,
आरभते, अवर्तत, पतिष्यथ, आगच्छ, लप्स्यते ।

| लट्लकारः | लृट्लकारः | लोट्लकारः | लङ्लकारः |
|---|---|---|---|
| | | | |
| | | | |
| | | | |
| | | | |

**२. शक्लृ शक्तौ धातोः लिट् लकार रूपाणि ।**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | शशाक | शेकतुः | शेकुः |
| मध्यमपुरुषः | शेकिथ | शेकथुः | शेक |
| उत्तमपुरुषः | शशाक-शशक | शेकिव | शेकिम |

©KTBS Not to be republished

३. **समुचितक्रियापदैः वाक्यानि पूरयत ।**

१. विद्यालये बालिकाः [ ] (नृत् लट्)

२. राजा युद्धं कर्तुम् अन्यदेशम् [ ] (गम्-लङ्)

३. त्वं किमर्थं [ ] (हस् लट्)

४. वयं सर्वे देवं [ ] (वन्द् लट्)

५. युवां संस्कृतम् [ ] (पठ्-लोट्)

६. बालकाः श्वः क्रीडाङ्गणे [ ] (खेल्-लृट्)

७. सरोवरे कमलानि [ ] (शुभ् लृट्)

८. बालकाः ! अनृतं मा [ ] (वद्-लोट्)

९. भवती कृपया दूरदर्शनं [ ] (दृश्य - लोट्)

१०. अहं श्वः मैसूरुनगरं [ ] (गम् - लृट्)

***यां चिन्तयामि सततं मयि सा विरक्ता***
***साप्यन्यमिच्छति जनं स जनोन्यसक्तः ।***
***अस्मत्कृते च परिशुष्यति काचिदन्या***
***धिक् तां च तं च मदनं च इमां च मां च ॥***

******

©KTBS Not to be republished

षष्ठः पाठः

# तिङन्तम् उपसर्गाश्च

क्रियापदस्य मूलरूपं धातुः । धातोः विकरणाख्यातप्रत्यययोः योगेन क्रियापदरूपं सिध्यति । क्रियापदं तिङन्तम् इत्यपि व्यवह्रियते । प्रायः द्विसहस्राधिकाः धातवः सन्ति । ते दशसु गणेषु विभक्ताः । एते पुनः परस्मैपदिनः, आत्मनेपदिनः, उभयपदिनः इति त्रिधा विभक्ताः । सर्वेषामपि धातूनां कालाद्यर्थप्रतिपादनार्थं दशलकाराः भवन्ति। ते च -

लट् वर्तमाने लेट् वेदे भूते लुङ्-लङ् लिटस्तथा ।
विध्याशिषोऽस्तु लिङ् लोटौ लृङ्-लृट्-लुट् च भविष्यति ।।

१. लट्-वर्तमानकालः

२. लङ्, लुङ्, लिट् → भूतकालः

३. लृट्, लृङ्, लुट् → भविष्यत्कालः

४. लोट् → आज्ञानिमन्त्रणामन्त्रणादि-अर्थेषु

५. लिङ्
- → विधिलिङ् (सम्भावना-उपदेश-विधि इच्छादिष्वर्थेषु)।
- → आशीर्लिङ् (आशीर्वादाद्यर्थेषु) ।

६. लेट् → एष लकारः वेदे एव उपयुज्यते ।

अष्टम कक्ष्यायां परस्मैपद-आत्मनेपद-धातूनां लट्-लङ्-लृट्-लोट् लकाराणां रूपाणि अधीतानि । अस्मिन् वर्षे आत्मनेपदधातूनां लट्, लङ्, लृट्, लोट्, विधिलिङ् लकाराणां परिचयं प्राप्नुमः।

©KTBS Not to be republished

# पुनः स्मारणम्

## पठ्-धातुः, विधिलिङ् लकारः (परस्मैपदी)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पठेत् | पठेताम् | पठेयुः |
| मध्यमपुरुषः | पठेः | पठेतम् | पठेत |
| उत्तमपुरुषः | पठेयम् | पठेव | पठेम |

### विशेषक्रियापदरूपाणि

## अस्-धातुः, लङ् लकारः (परस्मैपदी) भूतकालः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | आसीत् | आस्ताम् | आसन् |
| मध्यमपुरुषः | आसीः | आस्तम् | आस्त |
| उत्तमपुरुषः | आसम् | आस्व | आस्म |

## अस्-धातुः, लोट् लकारः (परस्मैपदी)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अस्तु/ स्तात् | स्ताम् | सन्तु |
| मध्यमपुरुषः | एधि/स्तात् | स्तम् | स्त |
| उत्तमपुरुषः | असानि | असाव | असाम |

## अस्-धातुः, विधिलिङ् लकारः (परस्मैपदी)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | स्यात् | स्याताम् | स्युः |
| मध्यमपुरुषः | स्याः | स्यातम् | स्यात |
| उत्तमपुरुषः | स्याम् | स्याव | स्याम |

©KTBS Not to be republished

**कृ-धातुः, लङ् लकारः (परस्मैपदी) भूतकालः**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अकरोत् | अकुरुताम् | अकुर्वन् |
| मध्यमपुरुषः | अकरोः | अकुरुतम् | अकुरुत |
| उत्तमपुरुषः | अकरवम् | अकुर्व | अकुर्म |

**कृ-धातुः, लृट् लकारः (परस्मैपदी)**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | करिष्यति | करिष्यतः | करिष्यन्ति |
| मध्यमपुरुषः | करिष्यसि | करिष्यथः | करिष्यथ |
| उत्तमपुरुषः | करिष्यामि | करिष्यावः | करिष्यामः |

**कृ-धातुः, लोट् लकारः (परस्मैपदी)**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | करोतु/ कुरुतात् | कुरुताम् | कुर्वन्तु |
| मध्यमपुरुषः | कुरु/कुरुतात् | कुरुतम् | कुरुत |
| उत्तमपुरुषः | करवाणि | करवाव | करवाम |

**कृ-धातुः, विधिलिङ् लकारः (परस्मैपदी)**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | कुर्यात् | कुर्याताम् | कुर्युः |
| मध्यमपुरुषः | कुर्याः | कुर्यातम् | कुर्यात |
| उत्तमपुरुषः | कुर्याम् | कुर्याव | कुर्याम |

©KTBS Not to be republished

**वदि धातुः, लट् लकारः (आत्मनेपदी)। वर्तमानकालः**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | वन्दते | वन्देते | वन्दन्ते |
| मध्यमपुरुषः | वन्दसे | वन्देथे | वन्दध्वे |
| उत्तमपुरुषः | वन्दे | वन्दावहे | वन्दामहे |

**लङ् लकारः**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अवन्दत | अवन्देताम् | अवन्दन्त |
| मध्यमपुरुषः | अवन्दथाः | अवन्देथाम् | अवन्दध्वम् |
| उत्तमपुरुषः | अवन्दे | अवन्दावहि | अवन्दामहि |

**लृट् लकारः**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | वन्दिष्यते | वन्दिष्येते | वन्दिष्यन्ते |
| मध्यमपुरुषः | वन्दिष्यसे | वन्दिष्येथे | वन्दिष्यध्वे |
| उत्तमपुरुषः | वन्दिष्ये | वन्दिष्यावहे | वन्दिष्यामहे |

**लोट् लकारः**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | वन्दताम् | वन्देताम् | वन्दन्ताम् |
| मध्यमपुरुषः | वन्दस्व | वन्देथाम् | वन्दध्वम् |
| उत्तमपुरुषः | वन्दै | वन्दावहै | वन्दामहै |

©KTBS Not to be republished

## विधिलिङ् लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | वन्देत | वन्देयाताम् | वन्देरन् |
| मध्यमपुरुषः | वन्देथाः | वन्देयाथाम् | वन्देध्वम् |
| उत्तमपुरुषः | वन्देय | वन्देवहि | वन्देमहि |

वि.सू-प्रथम-चतुर्थ-षष्ठ-दशमगणीयधातवः सर्वलकारेषु समानरूपाणि प्राप्नुवन्ति। यथा प्र.गणः-वन्दते, च.गणः-विद्यते, ष.गणः-म्रियते, द.गणः-अर्थयते।







©KTBS Not to be republished

वयं (उ.पु.ब.वचनम्)



वार्तापत्रिकाः पठामः मन्त्रान्

(एवं मध्यमपुरुष, प्रथम पुरुष, प्रयोगविषये शिक्षकाद्वारा ज्ञातव्यम् ।)

****

## उपसर्गाः

उपसर्गाः क्रियायोगे इति पाणिनिसूत्रानुसारेण प्रादयः क्रियापदानां योगे उपसर्ग संज्ञां लभन्ते । उपसर्गाः द्वाविंशतिः भवन्ति । उपसर्गाः अपि अव्ययरूपाः । एते क्रियापदानामादौ प्रयुज्यन्ते । ते - ''**प्र, परा, अप, सम्, अनु, अव ,निस्, निर्, दुस्, दुर्, वि, आङ्, नि, अधि, अपि, अति, सु, उत्, अभि, प्रति, परि, उप**''-इति ।

उपसर्गाणां योगेन क्वचित् धातूनाम् अर्थः व्यत्यस्तः भवति । क्वचित् प्रकृष्टार्थं प्राप्नोति । क्वचित् परस्मैपदिनः आत्मनेपदिरूपेण, आत्मनेपदिनः परस्मैपदिरूपेण परिवर्तन्ते ।

**उपसर्गेण धात्वर्थः बलादन्यत्र नीयते ।**
**प्रहाराहारसंहारविहार परिहारवत् ।।**

| उदाः- उपसर्गाः | | धातुः | क्रियापदम् |
|---|---|---|---|
| प्र | + | हृ | प्रहरति (ताडयति) |
| सं | + | हृ | संहरति (हन्ति) |
| आ | + | हृ | आहरति (आनयति) |
| वि | + | हृ | विहरति (विहारं करोति) |
| परि | + | हृ | परिहरति |

Not to be republished ©KTBS

['हृ' धातोः क्रियापदरूपस्य लट् लकारे ''हरति'' इति, उपसर्गयोगात् अर्थ व्यत्ययः भवति]

उपसर्गवशात् परस्मैपदम् आत्मनेपदं भवति।

परस्मैपदम् ⟶ आत्मनेपदम्

गम् गच्छति ⟶ सं + गच्छति ⟶ संगच्छते ।

स्था तिष्ठति ⟶ प्र + तिष्ठति ⟶ प्रतिष्ठते ।

जी जयति ⟶ वि + जयति ⟶ विजयते ।

आत्मनेपदम् ⟶ परस्मैपदम्

रम् रमते ⟶ वि + रमते ⟶ विरमति ।

परि + रमते ⟶ परिरमति ।

## अभ्यासः

**१. लकारपुरुषवचनानि लिखत ।**

१. पठेयम्  २. सन्तु  ३. वन्दध्वे  ४. वन्दै

**२. इतरवचनरूपाणि लिखत ।**

| | | | |
|---|---|---|---|
| १. | पठेः | .................. | .................. |
| २. | .................. | .................. | असाम |
| ३. | .................. | वन्देथाम् | .................. |
| ४. | .................. | .................. | वन्देमहि |

**३. वाक्ये योजयत ।**

१. आहरति  २. आसीत्  ३. कुर्मः  ४. सेवताम्

©KTBS Not to be republished

**४. संयोज्य लिखत ।**

| **अ** | **आ** |
|---|---|
| १ पठति | विधिलिङ् लकारः |
| २ लभताम् | लट् लकारः |
| ३ अपठत् | लोट् लकारः |
| ४ पठेत् | लृट् लकारः |
| ५ पठिष्यति | लङ् लकारः |

******

**चलामि धावामि पठामि नित्यम्**
**लिखामि पश्यामि वदामि सत्यम् ।**
**खेलामि खादामि हसामि कूर्दे**
**नमामि देवं स्वपिमि प्रसन्नः ।।**

**अस्मासु दोषौ वर्तेते दोषःसन्ति च रावणे।**
**दोषलेशोऽपि नास्त्यत्र चिन्त्यताम् अर्थसाधुता ।।**
(दोषौ = बाहू - दोः दोषौ दोषः)

*****

©KTBS Not to be republished

## सप्तमः पाठः

# सन्धिः

उच्चारणसमये वर्णानाम् अत्यन्तं सामीप्यं संहिता । यत्र संहिता अस्ति तत्र क्वचित् वर्णस्य व्यत्ययो भवति। अयमेव सन्धिः । सन्धौ त्रयः प्रकाराः सन्ति । यथा १) अच् सन्धिः (स्वरसन्धिः) २) हल् सन्धिः (व्यञ्जनसन्धिः) ३.विसर्गसन्धिः

स्वरसन्धीनां परिचयः अष्टमकक्ष्यायां कृतः । अत्र अध्यापकेन पुनः स्मारणं करणीयम् ।

## अच् सन्धिः (स्वरसन्धिः)

| | उदाहरणानि | सन्धि विभागः |
|---|---|---|
| १. सवर्णदीर्घसन्धिः। सूत्रम् - ''अकःसवर्णेदीर्घः''। | मुरारिः | मुर + अरिः |
| | विद्यालयः | विद्या + आलयः |
| | मुनीन्द्रः | मुनि + इन्द्रः |
| | गुरूपदेशः | गुरु + उपदेशः |
| | पितॄणम् | पितृ + ऋणम् |
| २. गुणसन्धिः। सूत्रम् - ''आद्गुणः''। | नरेन्द्रः | नर + इन्द्रः |
| | सूर्योदयः | सूर्य + उदयः |
| | राजर्षिः | राजा + ऋषिः |
| ३. वृद्धिसन्धिः । सूत्रम् - ''वृद्धिरेचि''। | एकैकम् | एक + एकम् |
| | देवैश्वर्यम् | देव + ऐश्वर्यम् |
| | वनौषधिः | वन + ओषधिः |
| | महौदार्यम् | महा + औदार्यम् |

©KTBS Not to be republished

| | | |
|---|---|---|
| ४. पूर्वरूपसन्धिः ।<br>सूत्रम् - ''एङः पदान्तादति''। | तेऽपि<br>कालेऽस्मिन्<br>एकोऽहम् | ते + अपि<br>काले + अस्मिन्<br>एको + अहम् |
| ५. यण्सन्धिः।<br>सूत्रम् - ''इकोयणचि''। | यद्यपि<br>मध्वरिः<br>पित्रंशः | यदि + अपि<br>मधु + अरिः<br>पितृ + अंशः |
| ६. यान्त-वान्तादेशसन्धिः।<br>सूत्रम् - ''एचोऽयवायावः''। | दिनयेव<br>नायकः<br>विष्णविति<br>तावपि | दिने + एव<br>नै +अकः<br>विष्णो + इति<br>तौ + अपि |
| ७. प्रकृतिभावः ।<br>(सन्धेरभावः) सूत्रम् -<br>''प्लुतप्रगृह्या अचि नित्यम्'' | हरी एतौ<br>गङ्गे इमे<br>अमी ईशाः | हरी + एतौ<br>गङ्गे + इमे<br>अमी + ईशाः |

## हल् सन्धिः (व्यञ्जनसन्धिः)

यत्र द्वयोः व्यञ्जनयोः (हलोः) संहिता तत्र व्यञ्जनसन्धिः । (जश्त्वसन्धौ उत्तरपदादौ स्वराः अपि भवन्ति ।) तत्र अनेके भेदाः सन्ति । यथा

**१. जश्त्वसन्धिः -(सूत्रम् - झलां जशोन्ते।)**

पूर्वपदान्ते विद्यमानस्य वर्गीयप्रथमाक्षरस्य (वर्गस्य प्रथमाक्षरम् क्-च्-ट्-त्-प्) स्वरे परे ; पञ्चमाक्षरं विहाय इतरे मृदुव्यञ्जने परे प्रथमाक्षरस्य स्थाने तृतीयाक्षरं भवति । [वर्गस्य तृतीयाक्षरम् ग्-ज्-ड्-द्-ब्]

©KTBS Not to be republished

उदा- वाक् +ईशः = वागीशः ।

वाक् + देवता = वाग्देवता ।

अच् + अन्तः = अजन्तः ।

अप् + जम् = अब्जम् ।

षट् + आननः = षडाननः ।

षट् + दर्शनानि = षड्दर्शनानि ।

जगत् + ईशः = जगदीशः ।

जगत् + गुरुः = जगद्गुरुः ।

सुप् + अन्तः = सुबन्तः ।

भगवत् + गीता = भगवद्गीता ।

**२. अनुनासिकसन्धिः - (सूत्रम्-यरोऽनुनासिकेऽनुनासिको वा।)**

पदान्तस्य वर्गस्य प्रथमाक्षरस्य अनुनासिके परे तस्य वर्गस्य पञ्चमाक्षरम् एव आदिष्टं भवति ।

[वर्गाणां पञ्चमाक्षारणि अनुनासिकानि ङ् ञ् ण् न् म्]

उदाः- वाक् + मयम् = वाङ्मयम् ।

तत् + मात्रम् =तन्मात्रम् ।

षट् + मासाः = षण्मासाः ।

षट् + मुखः = षण्मुखः ।

जगत् + नाथः = जगन्नाथः ।

षट् + नवतिः = षण्णवतिः ।

अप् + मग्नः = अम्मग्नः ।

©KTBS Not to be republished

## ३. श्चुत्वसन्धिः (सूत्रम् - स्तोः श्चुना श्चुः।)

सकार 'त' वर्गयोः श कार च वर्गाभ्यां योगे शकार- 'च'वर्गौ स्तः । चुः नाम च्-छ्-ज्-झ्-ञ् वर्णाः । तुः - त्-थ्-द्-ध्-न्-वर्णाः ।

स कारस्य श कारेण 'च' वर्गेण च सम्बन्धे स कारस्य शकारः आदेशो भवति। स + श्/च वर्गः = शकारः, 'त' वर्गस्य श कारेण 'च' वर्गेण च सम्बन्धे त वर्गस्य च वर्गः आदेशो भवति । 'त' वर्गः + श /'च' वर्गः = 'च' वर्गः अयं श्चुत्वसन्धिः ।

उदाः- हरिस् + शेते = हरिश्शेते ।

शरदस् + शतम् = शरदश्शतम् ।

रामस् + च = रामश्च ।

हरिस् + चन्द्रः = हरिश्चन्द्रः ।

तत् + च = तच्च ।

सत् + जनः = सज्जनः ।

शार्ङ्गिन् + जय = शार्ङ्गिञ्जय ।

## ४. अनुस्वारसन्धिः - (सूत्रम्-मोऽनुस्वारः।)

पदस्य अन्ते स्थितस्य म कारस्य व्यञ्जने परे अनुस्वारो भवति ।

उदाः- गुरुम् + वन्दे = गुरुं वन्दे ।

हरिम् + नमामि = हरिं नमामि ।

गृहम् + गच्छति = गृहं गच्छति ।

## ५. परसवर्णसन्धिः । (सूत्रम् - अनुस्वारस्य ययि परसवर्णः।)

पदस्य अन्ते स्थितस्य अनुस्वारस्य वर्गीयव्यञ्जनेषु परेषु वर्गस्य पञ्चमो वर्णः

©KTBS Not to be republished

आदेशो भवति ।

उदा:- त्वं + करोषि = त्वङ्करोषि ।

त्वं + चित: = त्वञ्चित: ।

अं + जनम् = अञ्जनम् ।

ग्रं + थ: = ग्रन्थ: ।

कं + पित: = कम्पित: ।

शं + कित: = शङ्कित: ।

*******

## अभ्यास:

**१. विभज्य सन्धिनाम लिखत ।**

१. मुरारि: २. राजेन्द्र: ३. स्थित्यन्तरम् ४. मन्वन्तर:

५. वागीश: ६. शरदृतु: ७. चिन्मय: ८. वाग्विलास:

**२. संयोज्य सन्धिनाम लिखत ।**

१. राजा + ऋषि: २. जगत् + गुरु: ३. शरदस् + शतम्

४. सत् + जन: ५. षट् + आनन: ६. तम् + नमामि

७. जगत् + नाथ: ८. ग्रं + थ:

## अवधेयांश:

### अनुस्वारस्य लेखनक्रम: ( ं = म् )

- पदान्ते - अनुस्वारस्य स्थाने म् इति लेखनीयम् ।



©KTBS Not to be republished

उदा - संस्कृतम्, धनम्, ज्ञानम्

- वाक्यान्ते - अनुस्वारस्य स्थाने म् इति लेखनीयम् ।

  उदा - अद्य अहं संस्कृतम् अपठम् ।
- वाक्यमध्ये - परवर्णः स्वरः चेत् म् इति लिखेत् ।

  परवर्णः व्यञ्जनं चेत् अनुस्वारं ( ं ) लिखेत् ।

  उदा - संस्कृतं सुलभम् अस्ति अतः त्वम् अपि पठ ।
- पदमध्ये - परवर्णः अवर्गीयव्यञ्जनं चेत् अनुस्वारं ( ं ) लिखेत् ।

  उदा - हंसः, सिंहः, वंशम्

  परवर्णः वर्गीयव्यञ्जनं चेत् अनुस्वारस्य स्थाने परवर्णवर्गस्य पञ्चमाक्षरं लिखेत् । उदा - कङ्कणम् , पञ्च , सन्धिः , मण्डलम्, पम्पा

## क्रियाकलापः

**१. विभज्य सन्धिनाम लिखत ।**

१. महेशः = महा + ईशः = गुणसन्धिः ।

२. तत्रैव = ________ + ________ = ________ ।

३. हरिश्शेते = ________ + ________ = ________ ।

४. षण्मुखः = ________ + ________ = ________ ।

५. कम्पितः = ________ + ________ = ________ ।

**२. संयोज्य सन्धिनाम लिखत ।**

१. गुरु + उपदेशः = ________ = ________ ।

२. नट + ईशः = ________ = ________ ।

३. हरिम् + वन्दे = ________ = ________ ।

©KTBS Not to be republished

४. अं + जनम् = __________ = __________ ।

५. षट् + नवति = __________ = __________ ।

६. जगत् + ईशः = __________ = __________ ।

७. एको + अहम् = __________ = __________ ।

**३. विभज्य सन्धिनाम लिखत ।** **सन्धिनाम**

१. तस्योपरि = [ ] + [ ] = [ ]

२. तत्रैकः = [ ] + [ ] = [ ]

३. इत्युक्त्वा = [ ] + [ ] = [ ]

४. एकोऽवदत् = [ ] + [ ] = [ ]

५. उभावपि = [ ] + [ ] = [ ]

**४. संयोज्य सन्धिनाम लिखत ।** **सन्धिनाम**

१. रजकस्य + अग्रे = [ ] = [ ]

२. पत्रस्य + उपरि = [ ] = [ ]

३. मध्यात् + एकेन = [ ] = [ ]

४. तत् + महाजनः = [ ] = [ ]

५. गतो + अभवत् = [ ] = [ ]

**५. पूर्णं कुरुत ।**

१. तत् + __________ = तदयम् ।

२. __________ + अवदत् = सोऽवदत् ।

३. छिद्रेषु + __________ = छिद्रेष्वनर्थाः ।

४. __________ + माम् = तन्माम् ।

©KTBS Not to be republished

अष्टमः पाठः

# विस्मृतभेदाः सन्तः

१. विस्मृतभेदाः सन्तो
निर्मलभावापन्नाः ।
एकीभावं हृदयारूढं सततं कुर्वन्तु ऽ ऽ
भोः भोः सततं कुर्वन्तु ऽ ॥ ॥ विस्मृत...॥

२. पूर्वजमुनिजनकविजनवाञ्छा सर्वेषामैक्यं
सुखिनस्सर्वे सन्त्विति गानं तेषां बहुहृद्यम् ।
भाषाधनमतजातिविभेदो हृदये मा भवतु
दुःखितदीनजनानुन्नेतुं हस्ताः प्रसरन्तु ऽ ऽ
भोः भोः, हस्ताः प्रसरन्तु ऽ ॥ ॥ विस्मृत...॥

३. गङ्गातुङ्गकावेरीजलमस्माकं मत्वा
कृतसङ्कल्पाः कार्यं कर्तुम् आलस्यं हित्वा ।
सुवर्णपुष्पां पृथिवीमेतां क्रष्टुम् आयान्तु
प्रवहतु कामं स्वेदस्रोतः धैर्यं मा जहतु ऽ ऽ
भोः भोः, धैर्यं मा जहतु ऽ ॥ ॥ विस्मृत...॥

४. घर्षणलुण्ठनवञ्चनहननं प्रलयं संयातु
स्नेहस्रोतः प्रवहतु भ्रातुर्भावो हृदि लसतु ।
अनिलः सलिलम् अनलः सर्वं सर्वेषामेकम्
प्रवहति रक्तमभक्तं मातुः भेदो मा भवतु ऽ ऽ
भोः भोः, भेदो मा भवतु ऽ ॥ ॥ विस्मृत...॥

**श्री जि. महाबलेश्वर भट्टः**

©KTBS Not to be republished

# पद्यतात्पर्यम्

१. भवन्तः परस्परभेदभावं विस्मरन्तु । मनसि- निर्मलभावः भवतु । भावैक्यं हृद्गतं भवतु ।

२. पूर्वजानां मुनीनां कवीनां च अभिप्रायः एक एव-सर्वे भवन्तु सुखिनः इति तस्मात् जातिमतभेदः, भाषाभेदः, धनिकदरिद्रभेदः मनसि मा भवतु । अपि च दुःखितानाम् दीनानां च विषये साहाय्यं कुर्वन्तु ।

३. गङ्गा तुङ्गा कावेरी इत्याद्याः नद्यः अस्माकमेव किल । आलस्यं त्यजन्तु। निरन्तरं कार्यं कर्तुं सर्वे बद्धादराः भवन्तु । स्वर्णकुसुमसदृशीं भूमिं कर्षयितुं आगच्छन्तु । अधिकस्वेदः भवति चेदपि धैर्यं मा त्यजन्तु ।

४. घर्षणं लुण्ठनं वञ्चनं हननं च सर्वत्र मा भवतु । स्नेहभावना सहोदरभावना च सर्वत्र भवतु । वायुजलाग्नयः सर्वेषां कृते समानाः एव । सर्वेषां शरीरे मातुः रक्तमेव प्रवहति । अत्र भेदभावः नास्ति ।

## कवेः परिचयः

कविः - विद्वान् जि. महाबलेश्वर भट्टः।

जननम् - १२-६-१९४८.

जन्मस्थानम् - हित्तलहळ्ळी, यल्लापुर-उपमण्डलम्, उत्तरकन्नड मण्डलम् ।

कृतयः - समासः, कारकम्, सन्धिः, कन्नडसंस्कृतक्रियापदकोषः ।

## अभ्यासः

**१) एकवाक्येन उत्तरं लिखत ।**

१. सर्वेषां ऐक्यं केषां वाञ्छा भवति?

२. हृदये कः विभेदः न भवेत्?

©KTBS Not to be republished

३. किं किं प्रलयं संयातु इति कवेः आशयः?

४. हृदये कीदृशः भावः लसेत्?

५. किमर्थं हस्तः प्रसरणीयः?

**२) रिक्तस्थानं पूरयत ।**

१. सुखिनस्सर्वे सन्त्विति गानं तेषां ____________।

२. सुवर्णपुष्पां ____________ क्रष्टुम् आयान्तु ।

३. अनिलः सलिलम् अनलः सर्वं सर्वेषाम् ____________।

**३) लिङ्गविभक्तिवचनानि लिखत**

१. वाञ्छा  २. सुखिनः  ३. तेषाम्  ४. मातुः

**४) लकारपुरुषवचनानि लिखत ।**

१. कुर्वन्तु  २. प्रदहति  ३. जहतु

**५) वाक्ये योजयत**

१. मत्वा  २. हृदये  ३. सततम्  ४. मा

**६) पर्यायपदानि लिखत ।**

१. धनम्  २. हस्तः  ३. अनिलः  ४. अनलः

**७) सन्धिं विभज्य नाम लिखत ।**

१. सन्त्विति  २. आलस्यं हित्वा  ३. भावापन्नाः

**८) विरुद्धार्थकपदानि लिखत ।**

१. भेदः  २. स्मरणम्  ३. ऐक्यम्  ४. निर्मलम्

**९) अन्यलिङ्गपदानि लिखत ।**

१. माता  २. सर्वे  ३. पूर्वजः

****

©KTBS Not to be republished

## अवधेयांशः

- **महाबलेश्वर भहस्य कार्यक्षत्रम् विशेषता।**

कार्यक्षेत्रम् - संस्कृतशिक्षणम् , विश्वविद्यालयेषु विशेषोपन्यासाः,
देशे अनेकविद्वद्गोष्ठीषु प्रबन्धोपस्थापनं च ।

एषः वरेण्यः बेङ्गलूरुनगरस्थे श्री चामराजेन्द्रसंस्कृतमहाविद्यालये व्याकरणशास्त्रस्य उपप्राध्यापकः आसीत् ।

**ओहाक् त्यागे धातोः लोट् लकार रूपाणि ।**

| | | |
|---|---|---|
| जहातु - जहितात् | जहिताम् | जहतु |
| जहाहि - जहीहि | जहितम् | जहित |
| जहानि | जहाव | जहाम |

**क्रियाकलापः**

- **रिक्तस्थाने समुचितं वर्णं लिखत ।**

१. धर्मस्थले एषः देवः विराजते ।

| | | | |
|---|---|---|---|
| म | | | थः |

२. कालिदासरचितं प्रसिद्धं नाटकम् एतत् ।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| अ | | ज्ञा | | | | न्त | लम् |

३. दशरथस्य पत्नीषु एषा अन्यतमा ।

| | | |
|---|---|---|
| | स | |

©KTBS Not to be republished

४. शृङ्गेर्याम् एषा नदी प्रवहति ।

| | | | |
|---|---|---|---|
| | ङ्गा | | दी |

५. अष्टाध्यायी ग्रन्थस्य कर्ता एषः ।

| | | |
|---|---|---|
| | णि | |

६. सिद्धगङ्गाक्षेत्रम् अस्मिन् मण्डले वर्तते ।

| | | | |
|---|---|---|---|
| तु | | कू | |

७. एषः कुन्त्याः पुत्रेषु अन्यतमः ।

| | | | |
|---|---|---|---|
| ध | | रा | |

८. महाभारतस्य कर्ता एषः ।

| | | | |
|---|---|---|---|
| वे | | | सः |

**आशायाः ये दासास्ते दासाः सर्वलोकस्य ।**
**आशा येषां दासी तेषां दासायते लोकः ।।**

*****

©KTBS Not to be republished

# नवमः पाठः

## प्रयोगाः

प्रयोगः त्रिविधः - १. कर्तरि २. कर्मणि ३. भावे इति । सकर्मकधातुभ्यः कर्तरि, कर्मणि इति द्वौ प्रयोगौ भवतः । अकर्मकधातुभ्यः कर्तरि भावे इति प्रयोगौ भवतः ।

### १. कर्तरि प्रयोगः

अस्मिन् प्रयोगे कर्तृपदं प्रथमा विभक्त्यन्तं भवति । कर्मपदं द्वितीयाविभक्त्यन्तं भवति । क्रियापदं कर्तृपदस्य पुरुषं वचनं च अनुसरति । कर्तरि प्रयोगे कर्तृपदस्य प्राधान्यम्। यथा छात्रः पाठं पठति।

### २. कर्मणि प्रयोगः

यस्याः क्रियायाः कर्माकांक्षा भवति तादृशक्रियावाचकः धातुः सकर्मकः। अयं प्रयोगः सकर्मकधातूनामेव सम्भवति । अस्मिन् प्रयोगे कर्मपदस्य प्राधान्यम् । कर्तृपदं तृतीयाविभक्त्यन्तं भवति । कर्मपदं प्रथमाविभक्त्यन्तं भवति । क्रियापदं कर्मपदम् अनुसरति । क्रियापदं आत्मनेपदान्तमेव भवति । मूलधातुना सह य योज्यते । (पठ् + य + ते) यथा छात्रेण पाठः पठ्यते ।

### ३. भावे प्रयोगः

यस्याः क्रियायाः कर्माकांक्षा न भवति स धातुः अकर्मकः । अयं प्रयोगः अकर्मकधातूनां सम्भवति । अस्मिन् प्रयोगे कर्तृपदं तृतीयाविभक्त्यन्तं भवति । कर्मपदं न भवति । क्रियापदम् आत्मनेपदान्तं प्रथमपुरुषैकवचनान्तं च भवति । यथा- बालकेन धाव्यते । त्रिविधप्रयोगेषु भेदः कः इति कोष्ठकं पश्यामः ।

©KTBS Not to be republished

| प्रयोगः | कर्तृपदम् | कर्मपदम् | क्रियापदम् | प्राधान्यम् |
|---|---|---|---|---|
| कर्तरि | प्रथमा विभक्त्यन्तम् | द्वितीया विभक्त्यन्तम् | परस्मैपदि आत्मनेपदि कर्तृपदमनुसरति | कर्ता |
| कर्मणि | तृतीया विभक्त्यन्तम् | प्रथमा विभक्त्यन्तम् | आत्मनेपदि कर्मपदमनुसरति धातुना सह 'य' योज्यते | कर्म |
| भावे | तृतीया विभक्त्यन्तम् | --------- | आत्मनेपदि प्रथमपुरुष - एकवचने एव | क्रियापदम् |

## कानिचन उदाहरणानि

| कर्तरि प्रयोगः | | | कर्मणि प्रयोगः | | |
|---|---|---|---|---|---|
| कर्तृपदम् | कर्मपदम | क्रियापदम् | कर्तृपदम् | कर्मपदम | क्रियापदम् |
| रामः | पत्रं | लिखति । | रामेण | पत्रं | लिख्यते । |
| त्वं | देवं | नमसि । | त्वया | देवः | नम्यते । |
| अहं | पाठं | पठामि । | मया | पाठः | पठ्यते । |
| अहं | त्वां | आह्वयामि | मया | त्वं | आहूयसे। |
| सः | मां | निन्दति । | तेन | अहं | निन्द्ये । |
| जननी | जलं | पिबति । | जनन्या | जलं | पीयते । |
| राधा | फलं | नयति । | राधया | फलं | नीयते । |
| बालकः | गुरून् | वन्दते । | बालकेन | गुरवः | वन्द्यन्ते । |
| भक्तः | देवं | पश्यति । | भक्तेन | देवः | दृश्यते । |

©KTBS Not to be republished

| | | | | | |
|---|---|---|---|---|---|
| सैनिकाः | देशं | रक्षन्ति । | सैनिकैः | देशः | रक्ष्यते । |
| सा | पाकं | करोति । | तया | पाकः | क्रियते । |
| उमा | मालां | धरति । | उमया | माला | ध्रियते । |
| गोपः | वृषभं | नयति । | गोपेन | वृषभः | नीयते । |
| भक्तः | भगवन्तं | स्तौति । | भक्तेन | भगवान् | स्तूयते । |
| बालः | क्षीरं | पिबति । | बालेन | क्षीरं | पीयते । |

| कर्तरि प्रयोगः | भावे प्रयोगः |
|---|---|
| १. शिशुः हसति । | शिशुना हस्यते । |
| २. सूर्यः प्रकाशते । | सूर्येण प्रकाश्यते । |
| ३. बालकाः क्रीडन्ति । | बालकैः क्रीड्यते । |
| ४. कन्याः हसन्ति । | कन्याभिः हस्यते । |
| ५. शिशुः स्वपिति । | शिशुना सुप्यते । |
| ६. शारदा नृत्यति । | शारदया नृत्यते । |
| ७. अहं अस्मि । | मया भूयते । |

## अभ्यासः

**१. एकवाक्येन उत्तरं लिखत ।**

१. कर्तरि प्रयोगे कर्तृपदं किं विभक्त्यन्तं भवति ?

२. भावे प्रयोगे क्रियापदं कस्मिन् पुरुषे भवति ?

३. कस्मिन् प्रयोगे कर्मपदं प्रधानं भवति ?

४. प्रयोगाः कति भवन्ति ?

©KTBS Not to be republished

**२. रिक्तस्थानं पूरयत ।**

१. ........................ धातुभ्यः कर्तरि भावे च प्रयोगौ भवतः ।

२. भावेप्रयोगे कर्तृपदं ............................ विभक्त्यन्तं भवति ।

३. यस्याः क्रियायाः कर्माकांक्षा भवति तादृशः क्रियावाचकाः धातवः ........................।

**३. प्रयोगपरिवर्तनं कुरुत ।**

१. गणेशः चित्रं लिखति ।

२. अहं गुरुं नमामि ।

३. राधा पाठं पठति ।

४. बालिकया जलं पीयते ।

**४. लघूत्तरं लिखत ।**

१. कर्तरि प्रयोगं विवृणुत ।

२. कर्मणिप्रयोगं विवृणुत ।

*******

**अवधेयांशः**

लज्ञासत्तास्थितिजागरणं वृध्दिक्षयभयजीवितमरणम्
नर्तन निद्रारोहण हासाः स्पर्धाकम्पनमोहनहासाः ।
शयनक्रीडारुचिदीप्त्यर्थाः धातव एते कर्मणि नोक्ताः ।।

उक्तैः अर्थैः सह सिध्दि-शुध्दि-नाश-तुष्ट्यादिषु अर्थेषु अपि धातवः अकर्मकाः भवन्ति।

**पायात् कुमारजनकः शशिखण्डमौलिः**
**शङ्खप्रभश्च निधनश्च गवीशयानः ।**
**गङ्गाश्च पन्नगधरश्च उमाविलासः**
**आद्यक्षरेण सहितो रहितोऽपि देवः ।।**

*****



©KTBS Not to be republished

## दशमः पाठः

# मूर्तिपूजारहस्यम्



(राजप्रासादे सर्वे अधिकारिणः स्वस्थानापन्नाः राज्ञः मङ्गलसिंहस्य आगमनं प्रतीक्षन्ते) (नेपथ्ये) इत इतो देवः । इत इतो महाराजः । (सर्वे सभ्याः सहसोत्थाय उद्घोषयन्ति) जयतु महाराजः । जयतु धर्मरक्षकः प्रजापालनपरायणो महाराजाधिराजः । जयतु ................

मङ्गलसिंहः - (समीपस्थं रिक्तमासनमवेक्ष्य साश्चर्यम्) रामसिंह ! परम पूजनीयानां स्वामिचरणानां सम्मानार्थमेव अयं समारम्भः आयोजितोऽस्माभिः । कथमिदानीमपि श्रीविवेकानन्दस्वामिनः नायाताः ?

द्वारपालः - (सत्वरं प्रविशन्) महाराज ! समागताः । समागताः ।

मङ्गलसिंहः - (आसनादुत्तिष्ठन्) किं पूज्यचरणाः श्रीविवेकानन्दस्वामिनः ?

द्वारपालकः - न हि । न हि । श्रीमन्तो मानसिंहनरेशाः समागताः ।

मङ्गलसिंहः - (साश्चर्यम्) कथमनिवेदितपूर्वं मानसिंहस्य अत्र आगमनम्? भवतु।

©KTBS Not to be republished

(ततः प्रविशति आखेटकवेषो मानसिंहः । मङ्गलसिंहः मानसिंहम् आश्लिष्य स्वसमीपम् उपवेशयति)

रामसिंहः - नियत एव समये समागताः स्वामिचरणाः प्रासादे ।

मानसिंहः - के नु खलु अमी स्वामिचरणाः?

मङ्गलसिंहः - सखे! मम मित्रेण खेत्रीनरेशेन अत्र सम्प्रेषिताः वङ्गदेशीयाः पौरस्त्यपाश्चात्यविद्यासु निष्णाताः, श्रीश्रीविवेकानन्दस्वामिनः ।

मानसिंहः - प्रासादं प्राप्ता अपि स्वामिचरणाः किमिति सभां नालङ्कुर्वन्ति?

रामसिंहः - महाराज! सन्न्यासिना गीतनृत्यादिरसास्वादनम् अनुचितमिति अत्र समीपवर्तिनि प्रकोष्ठे उपविष्टवन्तः स्वामिचरणाः । (नर्तकी आगत्य गायति नृत्यति च । गीतसमाप्तिसमकालं विवेकानन्दः प्रविशति ।)

सर्वे सभ्याः - (सहसोत्थाय) स्वामिनां पादारविन्दयोः प्रणामाः ।

मानसिंहः - (सोपहासं स्वामिनं निरीक्षमाणः स्वगतम्) किमयमपि सन्न्यासी? अपि वीतरागभयक्रोधोऽयम्? भवतु परीक्षे तावदेनम् । (स्वामिनं प्रति) स्वामिन्! किमिति पौरस्त्यपाश्चात्यविद्यापारङ्गतोऽपि भवानेवं भिक्षुर्भूत्वा भिक्षामटति?

विवेकानन्दः - (तम् आपादमस्तकं भूयो निरीक्ष्य) भवान् राजपदवीम् अलङ्करोति ननु?

मानसिंहः - अथ किम्? परम्पराप्राप्तं मे राजपदम्।

विवेकानन्दः - तत् किमर्थं भवान् राजकार्याणि परिहृत्य पाश्चात्यैः सह लुब्धक इव मृगयासु वृथा कालव्ययं करोति?

मानसिंहः - (साहङ्कारम्) स्वामिन्! अहं हि नरेशः राजा भूपः नृपः । यथा मे रोचते, तथा करोमि ।



©KTBS Not to be republished

विवेकानन्दः - (सस्मितम्) राजन्! अहमपि सन्न्यासी, परिव्राट्, दण्डी, सर्वसङ्गपरित्यागी च । तद् यथा मे रोचते तथा करोमि । भिक्षाटनं मे रोचते इति भिक्षाटनं करोमि ।

मानसिंहः - (साहङ्कारम्) स्वामिन्! अपि भवान् इतरजनवद् मूर्तिपूजायां बद्धादरः ?

विवेकानन्दः - बाढम् । पूर्वं नासम् । पश्चाद् गुरोः श्रीरामकृष्णदेवस्य कृपया बद्धादरोऽस्मि मूर्तिपूजायाम् ।

मानसिंहः - अहं तु मूर्तिपूजायां सर्वथा न विश्वसिमि । तत् का मे गतिर्भवति जननान्तरे ? (हसति)

विवेकानन्दः - (सहसोत्थाय भित्तिगतं राजचित्रं निरीक्षमाणः) सचिवमहाशय, अस्मिन् चित्रे थूत्क्रियताम् इति आदिदेश ।

सचिवः - (कम्पमानः) न-न-न-स-स-स-स्वा मि-च-र-णाः । (महाराजं सभयं वीक्षते)

विवेकानन्दः - (सर्वान् क्रमशः निरीक्ष्य) किं न कोऽपि वर्णलिप्ते कर्गजेऽस्मिन् थूत्कर्तुमपि समर्थोऽत्र राजसभायाम्? (मानसिंहं प्रति) राजन्! ज्ञातं खलु रहस्यं मूर्तिपूजायाः । भोः भोः मूर्तिपूजाविरोधिनः! अन्योऽयं राजा, अन्यच्च इदमस्य चित्रं निर्जीवं जडम् । एवं ज्ञात्वा अपि युष्मासु न कश्चिदपि कर्गजेऽ स्मिन् थूत्कर्तुमुत्सहते । किमत्र रहस्यम्? यतो हि सर्वेऽपि यूयम् इदं चित्रं न कर्गजरूपेण पश्यथ, अपि तु यस्य तच्चित्रं तस्य प्रतीकत्वेन । चित्राकृतौ साक्षात् महाराजं पश्यथ। सज्जनाः ! एवं मूर्तिपूजको भक्तः अश्म-धातु-काष्ठ-मृत्तिकादिभिः घटितासु मूर्तिषु राम-कृष्ण-गणेश-प्रभृतीन् देवान् साक्षात्करोति भावबलेन ।

सर्वे सभ्याः - अहो! स्वामिचरणानां प्रतिपादनकौशल्यम् (इत्युक्त्वा प्रणमन्ति)

©KTBS Not to be republished

मङ्गलसिंहः - (सानन्दम्) स्वामिचरणानां अनेन तत्त्वोपदेशेन नितरां प्रीतोऽस्मि (राजा आसनादुत्थाय विवेकानन्दस्वामिनं प्रणमति)

सर्वे - सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः । सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाक् भवेत् ।।

(मङ्गलसिंहः - पश्चिमभारतस्य आल्वारप्रान्तस्य रजपूतानाम् महाराजः ।

मानसिंहः - मङ्गलसिंहस्य सुहृत् सामन्तराजः ।)

## कवेः परिचयः

| | | |
|---|---|---|
| कविः | | डा।। श्रीधरभास्करवर्णेकरः । |
| कालः | - | १९१८-२००१ |
| देशः | - | वार्ने, सतारामण्डलम्, महाराष्ट्रराज्यम् । |
| कृतयः | - | विवेकानन्दविजयम्, अर्वाचीनसंस्कृतसाहित्यम्, श्रीशिवराज्योदयम्, संस्कृतवाङ्मयकोषः इत्यादयः । |
| पुरस्कारः | - | राष्ट्रपतिपुरस्कारः, कालिदासपुरस्कारः,सरस्वतीसम्मानम्। |

## अभ्यासः

**१. एकवाक्येन उत्तरं लिखत ।**

१. कस्य सम्मानार्थं मङ्गलसिंहेन समारम्भः आयोजितः?

२. कस्य भावचित्रस्य थूत्कारं कर्तुं स्वामी विवेकानन्दः अवदत् ?

३. राज्ञः आस्थानं विवेकानन्दः केन प्रेषितः?

४. मूर्तिपूजारहस्यं इति पाठस्य लेखकः कः ?

©KTBS Not to be republished

## २. संयोज्य लिखत ।

| अ | आ |
|---|---|
| १. आखेटवेष: | द्वारपालक: |
| २. परिव्राट् | राजा |
| ३. रामसिंह: | मानसिंह: |
| ४. विवेकानन्द: | सन्न्यासी |
| ५. मङ्गलसिंह: | वङ्गदेशीय: |

## ३. यथानिर्देशं लिखत ।

१. के नु खलु अमी स्वामिचरणा: ।

क: पाठ:? क: अवदत्? कम् अवदत्?

२. भिक्षाटनं मे रोचते इति कृत्वा भिक्षाटनं करोमि ।

क: पाठ:? कम् अवदत्? भिक्षाटनं कस्मै रोचते?

३. अस्मिन् चित्रे थूत्क्रियताम् ।

क: पाठ:? क: अवदत्? कस्य चित्रे?

## ४. सन्धिं कृत्वा नाम लिखत ।

१. कर्णजे + अस्मिन् २. तत् + चित्रम्

३. कश्चित् + अपि ४. सहसा + उत्थाय

## ५. समस्तपदं लिखित्वा समासस्य नाम लिखत ।

१. राज्ञ: आगमनम् २. स्वामिन: चरणेषु

©KTBS Not to be republished

३. स्वस्थानं आपन्ना: ४. महान् च असौ राजा च

६. **पर्यायपदाननि लिखत ।**

१. भूय: २. लुब्धक: ३. चरण: ४. सत्वरम्

७. **वाक्ये योजयत ।**

१. उत्थाय २. करोमि ३. परिहृत्य ४. पश्यन्तु

८. **प्रयोगपरिवर्तनं कुरुत ।**

१. सर्वे भद्राणि पश्यन्तु ।

२. अहं भिक्षाटनं करोमि ।

३. अस्मिन् चित्रे थूत्क्रियताम् ।

९. **लघूत्तरं लिखत ।**

१. प्रासादं प्राप्ता अपि स्वामिचरणा: किमर्थं सभां नालङ्कुर्वन्ति ?

२. विवेकानन्द: भिक्षाटनविषये मानसिंहं प्रति किम् उक्तवान्?

१०. **दशवाक्यै: संस्कृतभाषया,आङ्लभाषया, कन्नडभाषया वा उत्तरं लिखत।**

१. विवेकानन्द: मूर्तिपूजाया: वैशिष्ट्यं कथं प्रतिपादयति?

## अवधेयांश:

कोष: - सत्वरम् - सत्वरं चपलं तूर्णमविलम्बितमाशु च ।

राजा - राजाराट् पार्थिवक्ष्माभृत् नृपभूपमहीक्षित: ।

****

Not to be republished ©KTBS

# एकादशः पाठः

## समासः

- पदानां संक्षेपः समासः । अर्थमनुसृत्य पदद्वयस्य अनेकेषां पदानां वा संक्षेपेण कथनं समासः भवति । समस्तस्य पदस्य विवरणं येन वाक्येन उच्यते तद्वाक्यं विग्रहवाक्यम् ।
- समासे प्रधानतया चत्वारो भेदाः सन्ति ।

१. तत्पुरुषसमासः । - उत्तरपदार्थप्रधानः ।

२. अव्ययीभावसमासः । - पूर्वपदार्थप्रधानः ।

३ द्वन्द्वसमासः । - उभयपदार्थप्रधानः ।

४. बहुव्रीहिसमासः । - अन्यपदार्थप्रधानः ।

### १. तत्पुरुषसमास

अस्मिन् समासे प्रायः उत्तरपदस्य अर्थः प्रधानः भवति यथा - राजपुत्रः इति समस्तपदे पुत्रः इत्यस्य अर्थः मुख्यः ।

उदा - राजपुत्रम् आनयतु । अत्र आनयनक्रियायाम् उत्तरपदार्थस्य पुत्रस्यैव अन्वयः, न तु राज्ञः। तत्पुरुषे सप्त भेदाः सन्ति । यथा

| | नाम | विग्रहः | समासः |
|---|---|---|---|
| १. | प्रथमातत्पुरुषः | अर्धं ग्रामस्य | अर्धग्रामः |
| २. | द्वितीयातत्पुरुषः | गृहं गतः | गृहगतः |
| ३. | तृतीयातत्पुरुषः | नखैः भिन्नः | नखभिन्नः |
| ४. | चतुर्थीतत्पुरुषः | गवे हितम् | गोहितम् |
| ५. | पञ्चमीतत्पुरुषः | चोरात् भयम् | चोरभयम् |
| ६. | षष्ठीतत्पुरुषः | वृक्षस्य मूलम् | वृक्षमूलम् |
| ७. | सप्तमीतत्पुरुषः | कार्ये कुशलः | कार्यकुशलः |

©KTBS Not to be republished

**(तत्पुरुषसमासे विग्रहवाक्ये पूर्वपदानि विभिन्नविभक्त्यन्तानि भवन्ति)**

**१. नञ्समासः**

**नञ्समासः तत्पुरुषस्यैव कश्चित् भेदः । यथा -**

| | नाम | विग्रहः | समासः |
|---|---|---|---|
| १. | नञ्समासः | न धर्मः | अधर्मः |
| | | न इच्छा | अनिच्छा |
| | | न सन्देहः | असन्देहः |
| | | न अश्वः | अनश्वः |

**सू - १. नञ्समासे नकारस्य (न्) लोपः।**

**२. नञ्समासे उत्तरपदं यदि स्वरादि भवति भवति तर्हि अकारात् परः नकारः (न्) श्रयते**

**२. द्विगुसमासः**

● (सूत्रम् १) संख्यापूर्वो द्विगुः । २) द्विगुरेकवचनम्।)

द्विगुसमासः तत्पुरुषसमासस्य भेदः अस्ति । अत एव संख्यातत्पुरुषः इति एतस्य नामान्तरम् । अस्मिन् समासे पूर्वपदं संख्यावाचकं भवति ।

सामान्यतः अयं समासः नपुंसकप्रथमैकवचनरूपे भवति । क्वचित् ई कारान्तोऽपि भवति ।

**उदाहरणं यथा**

| **नाम** | **विग्रहवाक्यम्** | **समासः** |
|---|---|---|
| समाहारद्विगुः। | त्रयाणां भुवनानां समाहारः | त्रिभुवनम् । |
| | पञ्चानां तन्त्राणां समाहारः | पञ्चतन्त्रम् । |
| | नवानां रात्रीणां समाहारः | नवरात्रम् । |

©KTBS Not to be republished

| | | |
|---|---|---|
| | पञ्चानां पात्राणां समाहरः | पञ्चपात्रम् । |
| | अष्टानाम् अध्यायानां समाहारः | अष्टाध्यायी । |
| | पञ्चानां वटानां समाहारः | पञ्चवटी । |
| | सप्तानां पदानां समाहारः | सप्तपदी । |

३. **कर्मधारयसमासः** - (सूत्रम् - तत्पुरुषः समानाधिकरणः कर्मधारयः।)

कर्मधारयसमासोऽपि तत्पुरुषस्य प्रभेदः एव । अस्मिन् समासे विग्रहवाक्ये पूर्वोत्तरपदद्वयमपि प्रथमाविभक्तौ भवति ।

- कर्मधारयसमासे कानिचन उदाहरणानि पश्यामः ।

| **नाम** | **विग्रहवाक्यम्** | **समासः** |
|---|---|---|
| १) विशेषणपूर्वपदकर्मधारयः। | नीलं च तत् उत्पलं च<br>कृष्णश्च असौ सर्पश्च<br>श्वेतं च तत् वस्त्रं च | निलोत्पलम् ।<br>कृष्णसर्पः ।<br>श्वेतवस्त्रम् । |
| २) विशेषणोभयपदकर्मधारयः। | शीतं च तत् उष्णं च<br>शुक्लश्च असौ कृष्णश्च<br>शान्तश्च असौ अनुकूलश्च | शीतोष्णम् ।<br>शुक्लकृष्णः ।<br>शान्तानुकूलः । |
| ३) उपमानपूर्वपदकर्मधारयः। | मेघः इव श्यामः<br>फेनम् इव धवलः<br>छाया इव चपला | मेघश्यामः ।<br>फेनधवलः ।<br>छायाचपला । |
| ४) उपमानोत्तरपदकर्मधारयः । | नरः सिंहः इव<br>पुरुषः ऋषभः इव<br>नरः शार्दूलः इव | नरसिंहः ।<br>पुरुषर्षभः ।<br>नरशार्दूलः । |

Not to be republished ©KTBS

| | | |
|---|---|---|
| ५) सम्भावनापूर्वपदकर्मधारयः। | गङ्गा इति नदी<br>कैलासः इति पर्वतः<br>आम्रः इति वृक्षः | गङ्गानदी ।<br>कैलासपर्वतः ।<br>आम्रवृक्षः । |
| ६) अवधारणपूर्वपदकर्मधारयः। | विद्या एव धनम्<br>दुःखम् एव अग्निः<br>मुखम् एव चन्द्रः | विद्याधनम् ।<br>दुःखाग्निः ।<br>मुखचन्द्रः । |

## अभ्यासः

**१. एतेषां विग्रहवाक्यं विलिख्य समासनाम लिखत ।**

१. त्रिभुवनम् २. अष्टाध्यायी ३. कृष्णसर्पः

४. नरसिंहः ५. गङ्गानदी

**२. एतेषां समस्तपदं विलिख्य समासनाम लिखत ।**

१. नीलं च तत् उत्पलं च

२. कैलास इति पर्वतः

३. मेघः इव श्यामः

**३. रिक्तस्थानं पूरयत ।**

१. उत्तरपदार्थप्रधानः ................................ समासः।

२. पूर्वपदार्थप्रधानः ............................. समासः ।

३. अन्यपदार्थप्रधानः .......................... समासः ।

४. संख्यापूर्वः ............................ समासः ।

५. उभयपदार्थप्रधानः ..........................  समासः ।

Not to be republished ©KTBS

## अवधेयांशः

नीलः मेघः = नीलमेघः, नीलश्चासौ मेघश्च = नीलमेघः इति उभयथापि विग्रहः प्रदर्श्यते ।

**अन्यानि प्रसिद्धानि उदाहरणानि -**

नास्ति किञ्चन यस्य सः - अकिञ्चनः अन्यत् जन्म - जन्मान्तरम्,
वैयाकरणः खसूचिः - वैयाकरणखसूचिः

देवपूजकः ब्राह्मणः - देवब्राह्मणः
द्वन्द्वसमासे सर्वत्रापि समाहारद्वन्द्वसमासः भवितुम् अर्हति । किन्तु प्राण्यङ्ग -सेनाङ्गादिषु नित्य एव ।

*प्रायः प्रत्ययमादत्ते स्वगुणेषूत्तमादरः*

## क्रियाकलापः

**१. समस्तपदं लिखत ।**

१. नरः शार्दूलः इव २. राज्ञः सभा
३. विद्या एव धनम् ४. कुक्कुटश्च मयूरी च
५. माता च पिता च

**२. विग्रहवाक्यं विलिख्य समास नाम लिखत ।**

१. रामलक्ष्मणभरतशत्रुघ्नाः २. पुत्रपौत्रम्
३. दुःखाग्निः ४. विशाखापत्तनम्

©KTBS Not to be republished

द्वादशः पाठः

# दीपावलिः



विद्यार्थिनः - नमस्ते आचार्य दीपावलेः शुभाशयाः ।

आचार्यः - नमस्ते । उपविशन्तु ।(सर्वेऽपि उपविशन्ति) युष्मभ्यमपि दीपावलीशुभाशयाः । अस्मिन् अवसरे दीपावलीमहोत्सवस्य महत्त्वमपि किञ्चित् वदामि । पर्वणां महत्त्वं अज्ञात्वा, अन्धविश्वासेन एतेषामाचरणं कदापि न कुर्यात् । श्रद्धे, प्रसिद्धानामस्माकं पर्वणां नामानि वदति किम् ?

श्रद्धा - अस्तु श्रीमन् । केषाञ्चन पर्वणां नामानि वक्तुं प्रयते ।

आचार्यः - अस्तु, उच्यताम् ।

श्रद्धा - गणेशचतुर्थी, नवरात्रम् विजयदशमी, दीपावलिः, शिवरात्रिः, श्रीकृष्णजन्माष्टमी ........ मकरसङ्क्रमणम्, युगादिः, होलिकोत्सवश्च भारतवर्षस्य मुख्योत्सवाः सन्ति ।

रामदासः - श्रीमन्, सर्वैः भारतीयैः समाचर्यमाणेषु पर्वसु अतिसन्तोषदायकः उत्सवः कः ?

आचार्यः - अवश्यं वदामि । दीपावलिमहोत्सव एव सर्वमहोत्सवानां राजा । यतः एषः महोत्सवः वैभवेन दिनत्रयं समाचर्यते । दीपावल्यां नराणां हृदयेषु यादृशः उत्साहो जायते तादृशः नान्येषूत्सवेषु । अयं भारतीयानां पवित्रतमः उत्सवः अस्ति ।

प्रसादः - श्रीमन्, दिनत्रयस्य दीपावलिमहोत्सवस्य वैशिष्ट्यं विस्तरेण ज्ञातुमिच्छामि।

आचार्यः - अवश्यं वदामि । श्रुणुत । अयमुत्सवः आश्वयुजमासस्य कृष्णचतुर्दशी दिनादारभ्य कार्त्तिकमासस्य शुक्लप्रतिपद् यावत् सर्वत्र प्रचलति । अस्मिन् अवसरे जनाः स्वगृहाणि गोमयेन लिम्पन्ति । सर्वत्र प्रातः सायं च देवालयानां गृहाणां च पुरतः पङ्क्तिबद्धान् घृतदीपान् तैलदीपान् वा प्रज्वालयन्ति । एतत् वैज्ञानिकदृष्ट्यापि प्रमाणीकृतम् । एतेन वातावरणमपि शुद्धीभवति । परन्तु आधुनिककाले अन्यदीपानां विद्युद्दीपानां च अलङ्कारः केवलं सन्तोषार्थम् । दीपावलेः प्रथमो दिवसः नरकचतुर्दशी इत्युच्यते ।

शैलेन्द्रः - श्रीमन्, अस्य किमर्थं नरकचतुर्दशीति नामागतम् ?

आचार्यः - उत्तमः प्रश्नः । वदामि, शृण्वन्तु । द्वापरयुगान्ते एतस्मिन्नेव दिने सत्यभामासहितेन भगवता श्रीकृष्णेन प्रजापीडकः नरकासुरः हतः। तथैव बन्धितानां षोडशसहस्रस्य कन्यानां विमोचनं च कृतम्। नरकस्य मातुः भूदेव्याः प्रार्थनामङ्गीकृत्य तद्दिनं नरकचतुर्दशीति नाम्ना प्रसिद्धं भवतु, इति भगवता

©KTBS Not to be republished

श्रीकृष्णेनानुगृहीतः । बन्धुभिः परित्यक्तानाम् अनाथानाम् अबलानां तासां राजकुमारीणां च रक्षणं कृत्वा सामाजिकापवादं दूरीकर्तुं, ताः ऊढ्वा जीवनव्यवस्थां परिकल्पितवान् भगवान् वासुदेवः । एतस्मात् कारणादेव तस्य स्मरणार्थं इदानीमपि बहुत्र नूतनवधूवराणां सम्माननमपि क्रियते । सर्वे जनाः नूतनवस्त्राणि धृत्वा महान्तम् आनन्दमनुभवन्ति च ।

नागराजः - श्रीमन्, दीपावलेः द्वितीयं दिनं कथम् आचर्यते?

आचार्यः - श्रुणुत, दीपावलिमहोत्सवस्य द्वितीयदिवसे अमावास्यायां सर्वे धनलक्ष्मीं पूजयन्ति सम्पदं प्रार्थयन्ति च। तस्मिन् दिने समुद्रम थनकाले क्षीरसागरात् लक्ष्म्याः आविर्भावोऽभवत् । एतस्मिन् दिने वणिजः आपणे विशेषतः धनलक्ष्मीं सम्पूज्य इष्टार्थं प्रार्थयन्ति । इयं जनश्रुतिः यत् त्रेतायुगे अस्मिन् दिने श्रीरामचन्द्रः रावणं हत्वा अयोध्यां प्रत्यागतः। चतुर्दशवर्षानन्तरं सीतया लक्ष्मणेन च सहितं रामचन्द्रं प्राप्य, तत्रत्याः अयोध्यावासिनः दीपानां मालया तेषां स्वागतमकुर्वन् ।

सुजाता - श्रीमन्, द्वितीयदिवसे किमर्थं धनलक्ष्मीं पूजयन्तीति सम्यगवगतम् । तृतीयदिवसस्याचरणं कथं क्रियते?

आचार्यः - तृतीयदिवसः कार्त्तिकमासस्य शुक्लप्रतिपद् वर्तते । एषः बलिप्रतिपदिति ख्यातः । एतस्मिन् दिने त्रिपादपरिमितां भूमिं याचमानेन वामनरूपधारिणा भगवता विष्णुना त्यागवीरः बलिमहाराजः पाताललोकं प्रवेशितः । महात्यागिनः तस्य बलेः प्रार्थनामङ्गीकृत्य एतस्मिन् दिने सर्वेऽपि बलिपूजां कुर्युरिति भगवता विष्णुना वरः प्रदत्तः । अतः सर्वत्र बलिं पूजयन्ति।

©KTBS Not to be republished



अस्मिन् दिने गवान्तर्यामिनः गोपालकृष्णस्य प्रीत्यर्थं सर्वत्र भारतीयाः गोमातरं पूजयन्ति । अस्मिन् कार्त्तिकमासे एव विशेषतः देवालयेषु लक्षदीपोत्सवमाचरन्ति । केचन उत्थानद्वादशीदिने आमलकवृक्षसन्निधौ तुलसीपूजामपि कुर्वन्ति ।

छात्राः - गुरुवर्य, दीपावलीमहोत्सवस्य विषयं विस्तरेण ज्ञात्वा वयं सर्वे प्रमुदिताः । इतः परं वयमपि सर्वेषां पर्वणां वैशिष्ट्यं ज्ञात्वैव समाचराम। धन्यवादाः ।

आचार्यः - सर्वेभ्यः शुभं भूयात् ।

*****

©KTBS Not to be republished

## अभ्यासः

**१. एकवाक्येन उत्तरं लिखत ।**

१. सर्वेभ्यः अतिसन्तोषदायकः उत्सवः कः?

२. दीपावलिपर्वणः तृतीयदिनं किमिति ख्यातम् ?

३. कदा धनलक्ष्मीं पूजयन्ति?

४. सर्वत्र लक्ष्मीदीपोत्सवं कदा आचरन्ति?

५. बलिमहाराजः केन पाताललोकं प्रवेशितः ?

**२. ''आम् ''अथवा ''न'' इति लिखत ।**

१. द्वापरयुगे कृष्णः आसीत् ।

२. दीपावली पूर्णिमायां तिथौ भवति ।

३. त्रेतायुगे श्रीरामः आसीत् ।

४. दीपावलीदिने नूतनवर्षारम्भः भवति ।

**३. वाक्यदोषं परिहरत ।**

१. अस्य दिने मम जन्मोत्सवः भवति ।

२. भगवान् श्रीकृष्णेन नरकासुरः हतः ।

३. वर्षे बहवः पर्वाणि जनाः आचरन्ति ।

४. सर्वेपि उपविशति ।

**४. लिङ्ग-विभक्ति-वचनानि लिखत ।**

१. प्रतिपदि, २. पर्वाणि, ३. भगवता, ४. मातरम् ।

Not to be republished ©KTBS

**५. वाक्ये योजयत ।**

१. एतानि २. अस्माकम् ३. किल ४. उत्सवः

**६. पर्यायपदानि लिखत ।**

१. आचार्यः, २. छात्रः, ३. गृहम्, ४. श्रीकृष्णः

**७. विग्रहवाक्यं विलिख्य समासनाम लिखत ।**

१. प्रजापीडकः २. समुद्रमथनम् ३. दीपावलिः ४. बलिपूजा

**८. दशवाक्यैः संस्कृत भाषया, कन्नड भाषया आङ्ग्ल भाषया वा उत्तरं लिखत ।**

१. कार्त्तिकमासस्य शुक्लप्रतिपदि सर्वे जनाः किमर्थं बलिं पूजयन्ति ?

२. दीपावलिमहोत्सवस्य वैशिष्ट्यं विशदयत।

******

## अवधेयांशः

दीपाग्निशुद्धाश्च भवन्तु लोकाः चित्तेन वाचापि च कर्मणापि ।
शुद्धं प्रबुद्धं समुपैति लक्ष्मीः दीपावली साधयते समृद्धीः ।।
दीपावली दीपितसर्वलोका देदीप्यमाना हृदये जनानाम् ।
स्नेहं परेषां हितसाधनं च संवर्धयन्ती शुभमातनोतु ।।
शुभं करोतु कल्याणम् आरोग्यं धनसम्पदः ।
शत्रुबुद्धिविनाशाय दीपज्योतिः नमोऽस्तु ते ।।

©KTBS Not to be republished






तिथयः १५ - प्रतिपत्, द्वितीया, तृतीया, चतुर्थी, पञ्चमी, षष्ठी, सप्तमी, अष्टमी, नवमी, दशमी, एकादशी, द्वादशी, त्रयोदशी, चतुर्दशी, पूर्णिमा / अमावास्या ।।

वासराः ७ - भानुः, इन्दुः, कुजः, सौम्यः, बृहस्पतिः, भार्गवः, मन्दः ।।

नक्षत्राणि २७ - अश्विनी, भरणी , कृत्तिका, रोहिणी, मृगशिरा, आर्द्रा, पुनर्वसु, तिष्या, आश्लेषा, मघा, पूर्वाफाल्गुणी, उत्तरा, हस्ता, चित्ता, स्वाती, विशाखा, अनुराधा, ज्येष्ठा, मूला, पूर्वाषाढा, उत्तराषाढा, श्रवणा, धनिष्ठा, शतभिषा, पूर्वाभद्रा, उत्तराभद्रा, रेवती ।।

योगाः २७ - विष्कम्भः, प्रीतिः,आयुष्मान्, सौभाग्यम्, शोभनः, अतिगण्डः, सुकर्मा, धृतिः, शूलः, गण्डः, वृद्धिः , ध्रुवः, व्याघातः, हर्षणम्, वज्रः, सिद्धिः, व्यतीपात्, वरीयान्, परिघः, शिवः, सिद्धः, साध्यः, शुभः, शुक्लः, ब्रह्मा, ऐन्द्रः, वैधृतिः ।।

करणानि ११ - भवः, बालवः, कौलवः, तैतिलः, गरिजा, वणिजा, भद्रा, शकुनिः, चतुष्पात्, नागवान्, किंस्तुघ्नः ।।

******

©KTBS Not to be republished

## त्रयोदशः पाठः

# मार्गस्थो नावसीदति

**(कण्ठपाठः करणीयः)**

प्रत्यहं प्रत्यवेक्षेत
नरश्चरितमात्मनः ।
किं नु मे पशुभिस्तुल्यं
किं नु सत्पुरुषैरिति ।। १ ।।

अनुगन्तुं सतां वर्त्म
कृत्स्नं यदि न शक्यते ।
स्वल्पमप्यनुगन्तव्यम्
मार्गस्थो नावसीदति ।। २ ।।

हर्षस्थानसहस्राणि
भयस्थान शतानि च ।
दिवसे दिवसे मूढम्
आविशन्ति न पण्डितम् ।। ३ ।।

नाभिषेको न संस्कारः
सिंहस्य क्रियते वने ।
विक्रमार्जितसत्त्वस्य
स्वयमेव मृगेन्द्रता ।। ४ ।।

©KTBS Not to be republished

दानेन पाणिर्नतु कङ्कणेन
स्नानेन शुध्दिर्नतु चन्दनेन ।
मानेन तृप्तिर्नतु भोजनेन
ज्ञानेन मुक्तिर्न तु पूजनेन ।। ५ ।।

उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः
दैवेन देयमिति कापुरुषा वदन्ति ।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिद्ध्यति कोऽत्र दोषः ।।६।।

रे रे चातक सावधानमनसा मित्र क्षणं श्रूयताम्
अम्भोदा बहवो हि सन्ति गगने सर्वेऽपि नैतादृशाः ।
केचिद् वृष्टिभिरार्द्रयन्ति धरणीं गर्जन्ति केचिद् वृथा
यं यं पश्यसि तस्य तस्य पुरतः मा ब्रूहि दीनं वचः ।। ७ ।।

**अन्वयार्थः**

१. नरः= मानवः, प्रत्यहम् = प्रतिदिनम्, मे = मम कार्यम् (मम समस्तव्यवहारः), किं पशुभिः तुल्यम् = पशुसदृशम् अस्ति? (मृगैः समानम्) अथवा, किं सत्पुरुषैः इति = सज्जनैः सदृशं वर्तते? इति, आत्मनः चरितम् = स्वकीय- चरितम् (जीवननिर्हणम्) प्रत्यवेक्षेत = पर्यालोचयेत् । (विमर्शं कुर्यात्)

२. यदि सतां वर्त्म = यदि सज्जनानां मार्गम् (जीवनक्रमम्), कृत्स्नम् = समग्रम्, अनुगन्तुम् = अनुसर्तुम्, न शक्यते = न साध्यं चेत्, स्वल्पमपि = किञ्चिदपि, अनुगन्तव्यम् = अनुसरेत्, (किमर्थं चेत्) मार्गस्थः = मार्गे स्थितः (सन्मार्गप्रवर्तकः) न अवसीदति = न विनश्यति । (ध्येयं साधयति इत्यर्थः)

©KTBS Not to be republished

३. हर्षस्थानसहस्राणि = सन्तोषकरसहस्रसन्निवेशाः, च, भयस्थानशतानि = भयस्य शतसन्निवेशाः, दिवसे दिवसे =प्रतिदिनम्, मूढम् आविशन्ति = मूर्खाणां सम्भवन्ति । न पण्डितम् = (किन्तु) ज्ञानिनां न सम्भवन्ति । ज्ञानिनः स्थितप्रज्ञाः भूत्वा निर्लिप्ताः भवन्ति । सुखेन जीवन्ति च इति भावार्थः ।

४ सिंहस्य = वनराजस्य, वने=अरण्ये, अभिषेकः संस्कारः= पट्टाभिषेकादि संस्कारः, न क्रियते= न कुर्वन्ति । सः विक्रमार्जितसत्त्वस्य= स्वस्य पराक्रमस्य कारणतः एव, स्वयमेव= स्वतः एव मृगेन्द्रता= मृगराजस्य पदं प्राप्नोति।

५. पाणिः= करः, दानेन=दानक्रियया विभूषितः भवति । तु= परन्तु, कङ्कणेन= वलयादिभिः आभरणैः, न= विभूषितः न भवति । शुध्दिः स्नानेन= शरीरस्य शुचिः स्नानादिना भवति । तु= परन्तु, लेपनेन= चन्दनादि लेपनेन, न= न भवति । तृप्तिः= सन्तोषः, मानेन=आदरेण भवति । तु= परन्तु,भोजनेन= आहारादि सत्कारेण, न= न भवति । मुक्तिः= मोक्षः, ज्ञानेन=विद्यया प्राप्यते । तु= परन्तु,पूजनेन=डम्भाचरणेन, न=न प्राप्यते ।

६ उद्योगिनं पुरुषसिंहं लक्ष्मीः उपैति = कार्यतत्परं सिंहवत् साहसिनं पुरुषं प्रति सम्पत् स्वयम् आगच्छति । दैवेन देयम् = देवः अनुगृह्णाति, इति, कापुरुषाः = कुजनाः, वदन्ति = कथयन्ति, अतः दैवं निहत्य = अदृष्टे विश्वासम् परित्यज्य, आत्मशक्त्या = आत्मस्फूर्त्या, पौरुषं कुरु=पुरुषप्रयत्नं कुरु । यत्ने कृते = प्रयत्ने कृते सति, यदि न सिद्ध्यति = इष्टकार्यस्य सिद्धिः न भवति चेत्, अत्र कः दोषः = अत्र कोऽपि दोषः नास्ति । (कर्तव्यप्रज्ञया तृप्तिः भवति)सस

७. रे रे मित्र = भोः वयस्य ! चातक = चक्रवाकपक्षिन् ! सावधानमनसा = एकाग्रचित्तेन, क्षणं श्रूयताम् = एकं क्षणं शृणु । गगने = आकाशे, अम्भोदाः= मेघाः, बहवःसन्ति = बहवः वर्तन्ते, सर्वे अपि न एतादृशाः

Not to be republished ©KTBS

= किन्तु सर्वे मेघाः अपि एकप्रकाराः न भवन्ति । केचित् वृष्टिभिः = केचन मेघाः जलैः, धरणीम् = भूमिम्, आर्द्रयन्ति = सिञ्चन्ति, केचित् = केचन मेघाः, वृथा = व्यर्थम्, गर्जन्ति = नदन्ति, अतः यं यं पश्यसि = यं यं मेघं पश्यसि, तस्य तस्य पुरतः = तस्य तस्य मेघस्य पुरतः दीनं वचः = दीनवचनानि, मा ब्रूहि = मा वद । (अतः स्वाभिमानी भव इत्यर्थः )

## अभ्यासः

**१. एकवाक्येन उत्तरं लिखत ।**

१. कस्य वने संस्कारः न क्रियते ?

२. नरः प्रत्यहं किं प्रत्यवेक्षेत ?

३. पाणिः केन शोभते ?

४. लक्ष्मीः कम् उपैति ?

५. मुक्तिः कथं प्राप्यते ?

**२. सन्धिं कृत्वा नाम लिखत ।**

१. प्रत्यवेक्षेत          २. नैतादृशाः

३. नावसीदति          ४. विक्रमार्जितः

**३. विग्रहवाक्यं विलिख्य समासनाम लिखत ।**

१. पुरुषसिंहः          २. पशुतुल्यम्

३. आत्मशक्त्या          ४. मृगेन्द्रः

**४. पर्यायपदानि लिखत ।**

१. नरः          २. वर्त्म          ३. करः

४. मूर्खः          ५. मित्रम्          ६. गगनम्

©KTBS Not to be republished

५. **दशवाक्यैः संस्कृतभाषया,आङ्ग्लभाषया, कन्नडभाषया वा उत्तरं लिखता।**

१. सुभाषितकारः चातकं संबोध्य किं वदति, तस्य सन्देशः कः?

## क्रियाकलापः

- **वर्णक्रमं विचिन्त्य पदं रचयत ।**

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| १. | नी | न | स्कृ | न्दि | सं | त | | |
| २. | धा | व | न | सा | सा | म | न | |
| ३. | पु | ति | मु | रु | सिं | ष | पै | ह |
| ४. | न | मः | ज्ञा | प | स्यो | श | | |
| ५. | क्र | र्जि | त्व | वि | स | स्य | त | मा |
| ६. | र | र | श्मी | वा | नी | पु | का | सि |

१ ______________________________

२ ______________________________

३ ______________________________

४ ______________________________

५ ______________________________

६ ______________________________

©KTBS Not to be republished

उदाहरणानुसारं वाक्यानि रचयत ।




यथा - १. रामस्य अनुजः लमणः ।

©KTBS Not to be republished

# चतुर्दशः पाठः

## कारकाणि विशेषव्याकरणांशाश्च

यत् क्रियान्वयि तत् कारकम् । अन्वयो नाम सम्बन्धः । यत् क्रियया सह सम्बन्धं (अन्वयं) प्राप्नोति तत् कारकम् इति फलितार्थः ।

रामः पठति - अत्र पठनक्रियया सह रामस्य अन्वयः अस्ति । अतः रामः कारकम् । दण्डेन ताडयति - अत्रापि ताडनक्रियया सह दण्डस्य अन्वयो भवति । अतः दण्डेन कारकं भवति । एतच्च कारकं षड्विधं भवति । यथा -

कर्ता कर्म च करणं सम्प्रदानं तथैव च ।
अपादानमधिकरणमित्याहुः कारकाणि षट् ।। इति ।।

कारकमनुसृत्य विभक्तिः प्रवर्तते । सा कारकविभक्तिः इत्युच्यते ।

| कारकाणि | विभक्तिः | उदाहरणानि |
|---|---|---|
| १. कर्तृकारकम् | प्रथमा विभक्तिः (कर्तरि प्रयोगे)<br>तृतीया विभक्तिः<br>(कर्मणि प्रयोगे भावेप्रयोगे च) | रामः पठति ।<br>रामेण पठ्यते ।<br>बालिकया हस्यते । |
| २. कर्मकारकम् | द्वितीयाविभक्तिः (कर्तरि प्रयोगे)<br>प्रथमाविभक्तिः(कर्मणि प्रयोगे) | बालः पाठं लिखति ।<br>बालेन पाठः लिख्यते । |
| ३. करणकारकम् | तृतीयाविभक्तिः | रामः बाणेन रावणं हन्ति ।<br>मनुष्यः नेत्राभ्यां पश्यति । |
| ४. सम्प्रदानकारकम् | चतुर्थीविभक्तिः | राजा विप्राय गां ददाति ।<br>मेनका भिक्षुकाय धनं यच्छति। |
| ५. अपादानकारकम् | पञ्चमीविभक्तिः | वृक्षात् पर्णं पतति ।<br>जनकः नगरात् आगच्छति । |
| ६. अधिकरणकारकम् | सप्तमीविभक्तिः | कूपे जलम् अस्ति ।<br>मुखे दन्ताः सन्ति । |

©KTBS Not to be republished

**इदमवधेयम् :-**

दशरथस्य पुत्रः गच्छति। बालकस्य गृहे धेनुः अस्ति । वनस्य समीपं देवालयः अस्ति । एतेषु वाक्येषु षष्ठीविभक्तिः श्रूयते । किन्तु तस्याः क्रियया सह अन्वयो नास्ति। अतः कारकं न भवति । एषैव शेषषष्ठी अथवा सम्बन्धसामान्ये षष्ठी इति उच्यते ।




## विशेषव्याकरणांशाः

विभक्तीनां प्रवृत्तौ कारकत्वमेव निमित्तं न । कासाञ्चनविभक्तीनां प्रवृत्तौ उपपदमपि निमित्तं भवति । एताः विभक्तयः एव उपपदविभक्तयः इत्युच्यन्ते । तस्मात् विभक्तिः द्विविधा कारकविभक्तिः उपपदविभक्तिरिति।

**१. अभितः, परितः, उभयतः, प्रति इत्यादीनाम् अव्ययानां योगे तत्सम्बद्धं पदं द्वितीयाविभक्त्यन्तं भवति ।**

यथा- कृष्णम् अभितः गोपिकाः नृत्यन्ति ।
शालां परितः मार्गाः सन्ति ।
नगरेषु मार्गम् उभयतः आपणाः भवन्ति ।
अर्चना विद्यालयं प्रति गच्छति ।

©KTBS Not to be republished

**२. सह, साकम्, समम्, सार्धम्, अलम् एतेषां योगे तत्सम्बद्धं पदं तृतीयाविभक्त्यन्तं भवति । अलम् इत्यस्य अत्र क्रियानिषेधार्थः भवति**

यथा - रामेण सह/साकम्/समम्/ सार्धम् सीता वनम् अगच्छत् ।
अलं भोजनेन । अलं विवादेन ।

**३. नमः, स्वस्ति, स्वाहा- इत्यादीनां योगे तत्सम्बद्धं पदं चतुर्थीविभक्त्यन्तं भवति।**

यथा - गणेशाय नमः ।
पुत्राय स्वस्ति ।
इन्द्राय स्वाहा ।

**४. प्राक्, बहिः,आरभ्य - इत्यादीनां योगे तत्सम्बद्धं पदं पञ्चमीविभक्त्यन्तं भवति।**

यथा - गौतमी शालागमनात् प्राक् देवं वन्दते ।
देवालयात् बहिः सरोवरः अस्ति ।
प्रातःकालात् आरभ्य उपवासम् आचरति ।

**५. विना इत्यव्यययोगे तत्सम्बद्धं पदं द्वितीयाविभक्त्यन्तं तृतीयाविभक्त्यन्तं पञ्चमीविभत्यन्तं वा भवति ।**

यथा - वायुं/ वायुना / वायोः विना मानवः न जीवति ।
आरोग्यम् / आरोग्येण / आरोग्यात् विना सुखं नास्ति ।

## अभ्यासः

**१. एकवाक्येन उत्तरं लिखत ।**

१. कारकं नाम किम्?

२. का विभक्तिः कारकं न भवति ।

३. विना इति अव्यययोगे काः विभक्तयः भवन्ति?

©KTBS Not to be republished

**२. वाक्यदोषं परिहरत ।**

१. भोजनस्य प्राक् हस्तपादौ प्रक्षालय ।
२. नगरस्य अभितः ग्रामाः सन्ति ।
३. मित्रं स्वस्ति ।
४. तक्रस्य विना भोजनं नास्ति ।

**३. चतुर्थं पदं लिखत ।**

१. सम्प्रदानम् -चतुर्थी :: आधिकरणम् ____________ ।
२. कर्मकारकम् - द्वितीया :: अपादानम् ____________ ।
३. नमः- चतुर्थीविभक्तिः :: सार्धम् ____________ ।

**४. वाक्यं रचयत ।**

१. परितः     २. सह     ३. बहिः     ४. नमः

**५. अत्र रेखाङ्कितपदस्य कारकाणि निर्दिशत ।**

१. भीमः बकासुरं हन्ति ।
२. सीता अशोकवने आसीत् ।
३. आकाशात् वृष्टिः भवति ।
४. सूर्याय अर्घ्यं ददाति ।

**६. लघूत्तरं लिखत ।**

१. कति कारकाणि सन्ति? तानि कानि?

**रात्रिर्गमिष्यति भविष्यति सुप्रभातम्**
**भास्वानुदेष्यति हसिष्यति पङ्कजश्रीः ।**
**इत्थं विचिन्तयति कोषगते द्विरेफे**
**हा हन्त हन्त नलिनीं गज उज्जहार ।।**

*****

©KTBS Not to be republished

पञ्चदशः पाठः

# सिद्धिक्षेत्रम्



भारतदेशस्य उत्तरभागे स्थितं भूभागं 'आर्यावर्तः' इति कथयन्ति । तस्मिन् भूभागे काशी, अयोध्या, मथुरा, बदरी, केदारादीनि च पुण्यक्षेत्राणि विराजन्ते। दक्षिणभारते अस्माकं कर्णाटकराज्ये अपि गोकर्णः, उडुपि, शृङ्गेरी, धर्मस्थलं, बसवकल्याणादीनि पवित्रस्थानानि विराजन्ते । एतादृशपुण्यक्षेत्रेषु 'आदिचुञ्चनगिरिः' अपि प्राचीनं तथा सिद्धिक्षेत्रमिति प्रथितमस्ति ।

प्राचीनपवित्रक्षेत्रमिदं कर्णाटकराज्ये मण्ड्यमण्डले नागमङ्गलपत्तनस्य समीपे विराजते । उन्नतगिरियुक्तं क्षेत्रमिदं चन्दनादिवृक्षविशेषैः परिवृते परिसरे विराजते । अत्र वने मयूराः, हरिणाः, शशादयः प्राणिपक्षिणः इतस्ततः सदा अटन्तः प्राचीनऋष्याश्रमं स्मारयन्ति । इदं परिगणय्य कर्णाटकसर्वकारेण सुन्दरचेतोहारि वनमिदं मयूरवनम् इति नाम्ना निर्देशितमस्ति । अत्र वनस्पतयः, सुगन्धपुष्पलताः, गगनचुम्बिवृक्षाः, शुकपिककपोतादयः पक्षिणश्च दृश्यन्ते । अतीव रमणीयेऽस्मिन्

© KTBS Not to be republished

प्रदेशे अनेके ऋषयः, साधकाश्च तपः कृत्वा सिद्धिं प्राप्तवन्तः । अत एव क्षेत्रमिदं ''सिद्धिक्षेत्रम्'' इति प्रसिद्धमस्ति ।

क्षेत्रमिदं पुराणप्रसिद्धमपि भवति । एकदा लयाधिकारी परशिवः सिद्धयोगिरूपधारी भूत्वा 'चुञ्चनकट्टे' इति प्रदेशम् आगतः दक्षिणगङ्गा इति प्रसिद्धे कावेरीतटे तपः प्रारभत । तदा लङ्काधीश्वरेण रावणेनापहृतां सीतां अन्विष्यन्तौ रामलक्ष्मणौ तत्रैवागतवन्तौ । तौ तम् अवलोक्य सः साक्षात् 'परशिवः' इति ज्ञात्वा शिवस्तुतिं अकुरुताम् । तयोः स्तुत्या सन्तुष्टः परशिवः 'युवयोःइष्टार्थसिद्धिः भवतु' इत्यनुगृह्य तपः तप्तुं चुञ्चनगिरिक्षेत्रम् अगच्छत्। तस्य तपसः प्रभावेण इदं क्षेत्रं शैवक्षेत्रमिति प्रसिद्धम् अभवत्।

अस्य क्षेत्रस्य विषये कथामेकां कथयन्ति जनपदाः । यदा परशिवः चुञ्चनगिरिमागत्य अरण्ये ध्यानमग्नोऽभवत् तदा तत्र चुञ्चुः कञ्चश्चेति द्वावसुरौ निवसन्तौ आस्ताम्। एतयोः असुरयोः हिंसामसहमानाः शिष्टजनाः ऋषिगणाश्च परमेश्वरं भक्त्या प्रार्थितवन्तः । तदा स सिद्धयोगी स्वस्य दैवीशक्त्या तौ असुरौ जघान। एवमादौ चुञ्चासुरस्य निवासात् क्षेत्रमिदं 'आदिचुञ्चनगिरिः' इति प्रथितमभवत् ।

अत्र अनेके देवालयाः शोभन्ते । तेषु गङ्गाधरेश्वरः कत्तलेसोमेश्वरः, मल्लेश्वरः, चन्द्रमौलीश्वरः, कालभैरवेश्वरः, मालाम्बिकादेवी इत्यादयः प्रमुखाः । अस्य क्षेत्रस्य प्रधानभूतो देवस्तु गङ्गाधरेश्वरः । मन्दिरमिदं शिलामयं भवति। अस्मिन् मन्दिरे अष्टात्रिंशत् शिलास्तम्भाः सन्ति । एकैकोऽपि शिल्पकलावैभवेन विराजते । प्रतिसंवत्सरमत्र रथोत्सवः वैभवेन प्रचलति । अस्मिन्नवसरे सहस्रशः भक्ताः सम्मिलन्ति ।

कालभैरवेश्वरदेवालयोऽपि अत्रैव विराजते । पुरातनमन्दिरमिदम् इतः पूर्वं जीर्णावस्थायामासीत् ।

©KTBS Not to be republished

श्रीबालगङ्गाधरनाथमहास्वामिनां परिश्रमेण बृहन्मन्दिरं निर्मितमस्ति। नूतनमन्दिरमिदं विशालं विश्वविख्यातञ्च । गर्भगृहे विराजमानो कालभैरवेश्वरविग्रहस्तु मनोहरः भवति ।



प्रतिदिनं सहस्राधिकाः भक्ताः अत्रागत्य इष्टार्थफलप्राप्त्यर्थं प्रार्थयन्ति । अत्र आगतानां भक्तानां सर्वेषां सदा भोजनव्यवस्था भवति ।

कालभैरवेश्वरस्य दक्षिणे पार्श्वे मालविकादेव्याः मूर्तिः अस्ति । ग्रामीणजनाः इमां देवीं 'मालम्मा' इति नाम्ना सम्बोधयन्ति । अस्य क्षेत्रस्य मठस्य शिक्षणसंस्थाः अपि कर्णाटकराज्ये अनेकग्रामेषु नगरेषु च विद्यन्ते । तेषु बेळ्ळूरु इति स्थले स्थितः वैद्यकीयमहाविद्यालयः, बेंगलूरु, चिक्कमगलूरु, चिक्कबळ्ळापुर इति नगरेषु स्थिताः तान्त्रिकमहाविद्यालयाः च प्रसिद्धाः सन्ति । एतान् अतिरिच्य ग्रामीणप्रदेशेष्वपि विविधविद्यासंस्थाः वर्तन्ते ।

संस्कृतस्य प्रसारार्थं प्रचारार्थं च श्रीमठद्वारा समीचीनतया कार्यं प्रचलति। अत्र श्री कालभैरवेश्वरसंस्कृतवेद-आगममहाविद्यालयः, हासने नगरे

© KTBS Not to be republished

श्रीआदिचुञ्चनगिरिसंस्कृतमहाविद्यालयश्च अस्ति । एवं संस्कृतसंरक्षणपोषणार्थं एतेषां स्वामिनां योगदानम् अद्वितीयमस्ति ।

## अभ्यासः

**१. एकवाक्येन उत्तरं लिखत ।**

१. लयाधिकारी कः?

२. आदिचुञ्चनगिरि क्षेत्रस्य प्रधानभूतः देवः कः?

३. आदिचुञ्चनगिरिवने कौ असुरौ आस्ताम्?

४. आदिचुञ्चनगिरिः कुत्रास्ति?

**२. रिक्तस्थानं पूरयत ।**

१. क्षेत्रमिदं ______________ इति प्रसिद्धमस्ति।

२. ______________ नदी दक्षिणगङ्गा इति प्रसिद्धा ।

३. भारतदेशस्य उत्तरभागे स्थितं भागं ____________ इति कथयन्ति ।

४. कालभैरवेश्वरस्य दक्षिणे पार्श्वे ______________ मूर्तिः अस्ति ।

**३. अन्यलिङ्गपदं लिखत ।**

१. अस्य  २. अयम्  ३. रमणीयः  ४. सः

**४. सन्धिं कृत्वा सन्धिनाम लिखत ।**

१. अत्र + एव  २. रमणीये + अस्मिन्

३. को + अपि  ४. इति + आदिदेश

**५. पुरुषत्रये लिखत ।**

१. अस्ति  २. अभवत्  ३. गच्छतु

©KTBS Not to be republished

६. **संयोज्य लिखत ।**

| | अ | आ |
|---|---|---|
| १. | मालविकादेवी | वृक्षः |
| २. | हासन नगरे | परशिवः |
| ३. | लयाधिकारी | आदिचुञ्चनगिरिमहाविद्यालयः |
| ४. | शाल्मली | मालम्मा |

७. **इतरवचनरूपाणि लिखत ।**

१. तपः ______ ______

२. तस्मिन् ______ ______

३. ______ ______ अभवन्

४. ______ शोभेते ______

८. **लघूत्तरं लिखत ।**

१. पुराणरीत्या आदिचुञ्चनगिरेः का कथा भवति ।

९. **दशवाक्यैः संस्कृत, कन्नड वा आङ्ग्लभाषायां उत्तरं लिखत ।**

आदिचुञ्चनगिरिः इति नाम कथं प्रथितम् अभवत्?

*****

©KTBS Not to be republished

# क्रियाकलापः

एकदा राजकुमारः सिध्दार्थः विहारार्थम् उपवनम्__________ (गम् + क्त)। सहसा रोदनध्वनिं__________( श्रु+क्त्वा ) सः इतस्ततः अपश्यत् । बाणेन विध्दः एकः हंसः भूमौ__________ ( पत् + क्त ) आसीत् । एतत् __________ (दृश् + क्त्वा ) सिध्दार्थस्य चित्तं करुणया व्याकुलं जातम्। सः__________ ( धाव् + क्त्वा ) हंसस्य शरीरात् बाणं निष्कास्य तम् अङ्के अधारयत् । अत्रान्तरे देवदत्तः__________( धाव् + शतृ ) तत्र प्राप्तः । सिध्दार्थस्य हस्ते हंसं__________( दृश् + क्त्वा ) सः उच्चैः अवदत् - सिध्दार्थ! एषः मम हंसः मया बाणेन__________( नि+पात्+क्त), अतः मह्यं देहि । सिध्दार्थः दृढतया अवदत् - अहं न दास्यामि । अहं अस्य रक्षकः अस्मि । तदा तौ विवादं__________ (कृ+शतृ) राजसभां गतौ । राजा सर्वं वृतान्तम्__________( वि+ज्ञा+ल्यप्) आदिशत् - यस्य पार्श्वे हंसः आगमिष्यति तस्यैव भविष्यति। हंसः सिध्दार्थस्य समीपं__________ (गम्+क्तवतु) सत्यमिदम् । भक्षकात् रक्षकः श्रेयान् ।

****

अन्यक्षेत्रे कृतं पापं पुण्यक्षेत्रे विनश्यति ।
पुण्यक्षेत्रे कृतं पापं वज्रलेपो भविष्यति ।।

****

©KTBS Not to be republished

## षोडशः पाठः

# आत्मविडम्बनम्



**पीठिका**

दक्षसुता दाक्षायणी दक्षयज्ञे देहत्यागं कृत्वा, अपरस्मिन् जन्मनि पर्वतराजस्य पुत्रीत्वेन जन्म प्राप्तवती सैव पार्वती, तदर्थम् उग्रं तपश्चरति । तस्याः उग्रतपसा प्रीतः शिवः तां परीक्षितुं ब्रह्मचारिरूपेण तस्याः तपोवनमागत्य, आतिथ्यं स्वीकृत्य, तस्याः योगक्षेमं विचार्य, तपसः कारणं पृच्छति । शिवमेव पतिरूपेण प्राप्तुमनाः सा उग्रतपः करोति इति सख्या ज्ञात्वा, तस्याः शिवप्रीतिं परीक्षितुं स्वस्य विडम्बनं स्वयमेव करोति। अन्ततस्तु उमायाः अचलप्रेम विदित्वा, स्वकीयं शिवरूपं प्रदर्श्य, अभयं दत्त्वा विवाहार्थमनुमतिं दत्तवान् । काव्यभागोऽयं कालिदासस्य कुमारसंभवम् इति महाकाव्यस्य पञ्चमसर्गात् सङ्गृहीतः ।

© Not to be republished

कुले प्रसूतिः प्रथमस्य वेधसः
त्रिलोकसौन्दर्यमिवोदितं वपुः ।
अमृग्यमैश्वर्यसुखं नवं वयः
तपः फलं स्यात् किमतः परं वद ।। १ ।।

दिवं यदि प्रार्थयसे वृथा श्रमः
पितुः प्रदेशास्तव देवभूमयः ।
अथोपयन्तारमलं समाधिना
न रत्नमन्विष्यति मृग्यते हि तत् ।। २ ।।

तदा पार्वत्याः सखी ब्रह्मचारिणं वदति-एषा पार्वती पिनाकपाणिं पतिमाप्तुमिच्छति इति ।

अथाह वर्णी विदितो महेश्वरः
तदर्थिनी त्वं पुनरेव वर्तसे ।
अमङ्गलाभ्यासरतिं विचिन्त्य तं
तवानुवृत्तिं न च कर्तुमुत्सहे ।। ३ ।।

अवस्तुनिर्बन्धपरे कथं नु ते
करोऽयमामुक्तविवाहकौतुकः ।
करेणशम्भोर्वलयीकृताहिना
सहिष्यते तत् प्रथमावलम्बनम् ।। ४ ।।

त्वमेव तावत् परिचिन्तय स्वयं
कदाचिदेते यदि योगमर्हतः ।
वधूदुकूलं कलहंसलक्षणम्
गजाजिनं शोणितबिन्दुवर्षि च ।। ५ ।।

© KTBS Not to be republished

वपुर्विरूपाक्षम् अलक्ष्यजन्मता
दिगम्बरत्वेन निवेदितं वसु ।
वरेषु यद्बालमृगाक्षि मृग्यते
तदस्ति किं व्यस्तमपि त्रिलोचने ।। ६।।

**पार्वती उवाच-**

उवाच चैनं परमार्थतो हरम्
न वेत्सि नूनं यत एवमात्थ माम् ।
अलोकसामान्यमचिन्त्यहेतुकम्
द्विषन्ति मन्दाश्चरितं महात्मनाम् ।। ७ ।।

अकिञ्चनः सन् प्रभवः स सम्पदाम्
त्रिलोकनाथः पितृसद्मगोचरः ।
स भीमरूपः शिव इत्युदीर्यते
न सन्ति याथार्थ्यविदः पिनाकिनः ।। ८ ।।

**पार्वती सखीमुवाच-**

निवार्यतामालि किमप्ययं वटुः
पुनर्विवक्षुः स्फुरितोत्तराधरः ।
न केवलं यो महतोऽपभाषते
शृणोति तस्मादपि यस्स पापभाक् ।। ९ ।।

इतो गमिष्याम्यथवेति वादिनी
चचाल बाला रयभिन्नवल्कला ।
स्वरूपमास्थाय च तां कृतस्मितः
समाललम्भे वृषराजकेतनः ।। १० ।।

©KTBS Not to be republished

**अन्वयार्थः -**

१. प्रथमस्य वेधसः कुले एव प्रसूतिः = हिरण्यगर्भब्रह्मणः वंशे एव तव जननम्, त्रिलोकसौन्दर्यम् = त्रयाणाम् लोकानां चारुत्वम्, उदितम् इव तव वपुः = एकत्र समाहृतमिव तव शरीरम् अस्ति । ऐश्वर्यसुखम् = सम्पदा अनुभूयमानं सुखम् अमृग्यम् = न अन्वेषणीयम्, नवं वयः= नवतारुण्यम् (वर्तते), ततः परम्=इतोऽप्यधिकम्, तपःफलम्= तपसः फलम्, किं स्यात् = किं भवेत्, वद=कथय। (तपसा किं प्राप्तव्यम् आसीत् तत् पूर्वमेव त्वया सम्पादितम्, पुनः किमर्थं तपः इति भावः।)

२. दिवं यदि प्रार्थयसे = स्वर्गं यदि त्वं कामयसे (तर्हि) वृथाश्रमः = तव श्रमस्तु निष्फलः । किमर्थं चेत्, तव पितुः प्रदेशाः एव देवभूमयः = तव जनकस्य पर्वतराजस्य भूभागाः एव (हिमालयः) देवतानां वासस्थानम् । अथ (यदि) उपयन्तारं प्रार्थयसे = वरम् अभ्यर्थयसे (तर्हि) समाधिना अलम् । तपः नावश्यकम्। किमर्थं चेत् रत्नं न अन्विष्यति, तत् मृग्यते हि = रत्नं स्वयं आत्मनः क्रेता कः? इति न मृग्यते । क्रेत्रा एव तत् अन्विष्यते ।

३. अथ वर्णी आह = अनन्तरं ब्रह्मचारी उवाच, महेश्वरः विदितः= शिवः कीदृशः इति मया ज्ञायते । त्वं पुनः तदर्थिनी एव वर्तसे = पुनरपि त्वं तमेव अपेक्षमाणा अस्ति । अमङ्गलाभ्यासरतिं तं विचिन्त्य = यस्य अमङ्गलाचारे प्रीतिः अस्ति तादृशं तं महेश्वरं प्रति सम्यक् विचार्य तव अनुवृत्तिं कर्तुं न उत्सहे = तव अनुसरणं कर्तुं न उत्सहे । (पार्वत्याः मनोरथस्य विषये अनुमतिं दातुं मम उत्साहः नास्ति इति ब्रह्मचारी निर्दाक्षिण्यं वदति)

४. अवस्तुनिर्बन्धपरे = असारवस्तुनि (तुच्छवस्तुनि) हठपरे पार्वति, आमुक्तविवाह कौतुकः ते अयं करः =आबद्धविवाहहस्तसूत्रः तव अयं करः, वलयीकृताहिना शम्भोः करेण = कङ्कणरूपेण भूषणीकृतसर्पेण शिवस्य

©KTBS Not to be republished

हस्तेन, तत् प्रथमावलम्बनं= तत् प्रथमं पाणिग्रहणं केन प्रकारेण ( कथं) सहिष्यते? (मर्षिष्यति)

५. कलहंसलक्षणं वधूदुकूलं = कलहंसचित्रितं नववधूदुकूलं (दुकूलं = चीनांशुकशाटिका) शोणितबिन्दुवर्षि गजाजिनम् = रक्तबिन्दुवर्षि गजस्य चर्म-एते द्वे कदाचित् = जातु, यदि योगं अर्हत:? = यदि अनुरूपताम् अर्हत: किं? इति त्वमेव तावत् परिचिन्तय स्वयं = त्वमेव तावत् स्वबुद्ध्या विचारय ।

६. वपु: विरूपाक्षम् = शिवस्य वपु: (शरीरं) विकृतनयनयुक्तम्, अलक्ष्य जन्मता = अज्ञातोत्पत्ति:, (तस्य जन्म विषये किञ्चिदपि न ज्ञायते) वसु= शिवस्य सम्पत्, दिगम्बरत्वेन = नग्नत्वेन सूचितम् (स: अकिञ्चन: इति अभिप्राय: ) बालमृगाक्षि = हे बालहरिणाक्षि, (बालमृगस्य अक्षिणी इव अक्षिणी यस्या: सा) वरेषु यद् मृग्यते तत् = वरेषु रूपधनादिकं यद् अन्विष्यते तत्, त्रिलोचने व्यस्तमपि शिवे एकमपि अस्ति किम्? (नास्त्येव इत्यर्थ: )

७. (पार्वती) एनम् उवाच च = अनन्तरं पार्वती, एवं जटिलं प्रति अवदत्, (त्वं) परमार्थत: हरं न वेत्सि= त्वं स्वरूपत: (तत्त्वत:) शिवं न जानासि । यत: माम् एवम् आत्थ = तस्मात् कारणात् मां प्रति एवं प्रकारेण कथयसि । मन्दा: = मूर्खा: (अल्पबुद्धय:). अलोकसामान्यम्= लोकविलक्षणं अचिन्त्यहेतुकं चिन्तितुम् अशक्यम्, महात्मनाम् = महापुरुषाणां चरितं द्विषन्ति = चरितं दूषयन्ति ।

८. स: = हर:, अकिञ्चन: सन्,= दरिद्र: सन्, सम्पदां प्रभव:= सकलैश्वर्याणां उत्पादक: अस्ति । पितृसद्मगोचर: सन् = श्मशाने विहरन् सन्, त्रिलोकनाथः= त्रिभुवनस्य प्रभुः अस्ति, स भीमरूपः = सः भयङ्कररूपः तथापि शिव:

इति उदीर्यते = मङ्गलरूपी इति उच्यते । अतः पिनाकिनः = अतः हरस्य, याथार्थ्यविदः न सन्ति = अतः हरस्य यथार्थज्ञानिनः न सन्ति।

९. हे आलि = हे सखि, स्फुरितोत्तराधरः = कम्पितोष्ठः, पुनः, किमपि विवक्षुःअयं वटुः, निवार्यताम् = यथा किमपि न वदेत् तथा कुर्यात् । यः महतः अपभाषते = यः पूज्यान् निन्दति, न केवलं सः पापभाक् भवति = न केवलं सः अपि पापं भुङ्क्ते, किन्तु तस्मादपि यः श्रृणोति, सः अपि पापभाक् भवति = तादृशः पुरुषः अपि पापं भुङ्क्ते ।

१०. अथवा इतः गमिष्यामि = अथवा अस्मात् प्रदेशात् अहमेव यास्यामि इति वादिनी, रयभिन्नवल्कला बाला चचाल = एवं वदन्ती चलनस्य वेगवशात् स्रस्तवल्कला (चलितोत्तरीया) सा पार्वती चलितवती । सः तदा कृतस्मितः = हसन्, वृषराजकेतनः = वृषभध्वजः शिवः, स्वस्वरूपम् आस्थाय = निजरूपम् धृत्वा, तां = पार्वतीं समाललम्बे = तस्याः पाणिं गृहीतवान् ।

**कवेः-काल-देश-कृतीनां परिचयः-**

| | | | |
|---|---|---|---|
| कविः | - | कालिदासः । | |
| कालः | - | प्रायः क्रि.श.प्रथमे, चतुर्थे, पञ्चमे वा शतके आसीदिति मतम्। | |
| देशः | - | उज्जयिनी । तत्र विक्रमादित्यस्य आस्थाने नवमणिषु कविषु अन्यतमः आसीदिति श्रूयते । | |
| कृतयः | - | १. | रघुवंशम्, कुमारसम्भवं च - इति द्वे महाकाव्ये । |
| | | २. | मेघदूतम्, ऋतुसंहारं च - इति द्वे खण्डकाव्ये । |
| | | ३. | विक्रमोर्वशीयम्, मालविकाग्निमित्रम्, अभिज्ञानशाकुन्तलं चेति त्रीणि नाटकानि । |
| प्रशंसा | - | रघुकविः, कविकुलगुरुः, उपमाकालिदासस्य इत्यादयः । | |

©KTBS Not to be republished

## अभ्यासः

**१. एकवाक्येन उत्तरं लिखत ।**

१. कालिदासेन विरचिते द्वे महाकाव्ये के?

२. शिवस्य वसु केन निवेदितम्?

३. के न योगमर्हतः?

४. कः भीमरूपः अस्ति ?

५. मन्दाः किं द्विषन्ति?

**२. यथा निर्देशं लिखत ।**

१. न रत्नमन्विष्यति मृग्यते हि तत् ।

कः पाठः? कः अवदत्? अत्र रत्नं का?

२. तवानुवृत्तिं न च कर्तुमुत्सहे ।

कः पाठः? कः अनुवृत्तिं कर्तुं न उत्सहते? कां अवदत्?

३. तदस्ति किं व्यस्तमपि त्रिलोचने

कः पाठः? कः अवदत्? काम् अवदत्?

**३. रिक्तस्थानं पूरयत ।**

१. परशिवः पार्वत्याः समीपं .................... रूपेण आगतवान् ।

२. दिगम्बरत्वेन निवेदितं ....................।

३. पार्वत्याः प्रसूतिः .................... कुले अभवत् ।

४. पार्वत्याः पितुः प्रदेशाः ...................... भूमयः ।

५. पार्वती ......................... पतिम् आप्तुम् इच्छति ।

©KTBS Not to be republished

४. **संयोज्य लिखत ।**

| अ | आ |
|---|---|
| १. वर्णी | चन्द्रः |
| २. पितृसद्म | पिनाकी |
| ३. कलावान् | पार्वती |
| ४. वृषराजकेतनः | श्मशानम् |
| ५. दाक्षायणी | वटुः |

५. **पर्यायपदानि लिखत ।**

१. प्रसूतिः २. वपुः ३. अनुवृत्तिः
४. अहिः ५. अजिनम् ६. शोणितम्

६. **वाक्ये योजयत ।**

१. अलम् २. वृथा
३. यदि ४. सम्प्रति

७. **सन्धिं कृत्वा नाम लिखत ।**

१. गज + अजिनम् २. प्रदेशाः + तव
३. यत् + बाल ४. अथवा + इति
५. दिक् + अम्बरः

८. **लिङ्ग-विभक्ति-वचनानि लिखत ।**

१. पिनाकिनः २. तस्मात्
३. पापभाक् ४. वपुः

©KTBS Not to be republished

**९. समस्तपदं विलिख्य समासनाम लिखत ।**

१. देवानाम् भूमयः २. गजस्य अजिनम्

**१०. लघूत्तरं लिखत ।**

१. परमार्थतः शिवः कथम् अस्ति ?

२. तपः फलं किम् किम् ?

*****

पुरा कवीनां गणनाप्रसङ्गे
कनिष्ठिकाधिष्ठित कालिदासः।
अद्यापि तत्तुल्यकवेरभावात्
अनामिका सार्थवती बभूव।।

उपमा कालिदासस्य भारवेरर्थगौरवम्।
दण्डिनः पदलालित्यं माघे सन्ति त्रयोगुणाः।।

©KTBS Not to be republished

## सप्तदशः पाठः

# वेदगणितज्ञः



©KTBS Not to be republished

१. गणितविषये भारतस्य योगदानं जगत्येवासदृशं वर्तते । शून्यान्वेषणप्राज्ञाः भारतीयाः एवेत्यङ्गीकरोति विश्वमिदं सर्वदा । भारतीयगणितपरम्परा अतीवविशिष्टा प्राचीना चास्ति। वेदेषु तत्कालिकेषु अन्यग्रन्थेषु च गणितीयांशानाम् उल्लेखः विशेषतः दृश्यते । जनैः बहूनां गणितीयविषयाणां ज्ञानं भारतादेव प्राप्तमिति विज्ञायते । आर्यभट-भास्कर-वराहमिहिरादयः गणितज्ञाः सुप्रसिद्धाः एव । आधुनिकेषु गणितज्ञेषु श्रीश्रीश्री भारतीकृष्णतीर्थस्वामिमहाभागः वेदगणितस्य साक्षात्कर्ता विराजते। धार्मिक विषयेष्वपि वैज्ञानिक विषयाः सन्ति इत्यंशः वेदेष्वन्तर्गतः इति ऐदम्प्राथम्येनाकथयत् स्वामिमहाभागः।

२. गणितज्ञः स्वामिवरेण्यः क्रि.श.१८८४ तमे वर्षे मार्च्-मासस्य १४ दिनाङ्के तमिळुनाडुराज्यस्य तिन्नवेलि ग्रामे अजायत । 'वेङ्कटरमणः' इति पित्रा

कृतनामधेयः एषः बाल्यादेव मेधावी, श्रद्धासम्पन्नः, कक्ष्यासु सर्वदा प्रथमः ज्ञानपिपासुः च आसीत्। गुरोः वेदमूर्ति श्रीवेङ्कटराजशास्त्रिणः सकाशात् संस्कृतं सम्यग् अधीतवान्। यदा एषः मेट्रिक्युलेषन् परीक्षां स्वीकृतवान् तदैव मद्रास् संस्कृतसङ्घः एतस्य पाण्डित्यं दृष्ट्वा 'सरस्वती' इत्युपाधिना सत्कारम करोत् । अनन्तरं पदवीशिक्षणं समाप्य अमेरिका-विज्ञान-महाविद्यालयस्य मुम्बयिकेन्द्रे स्नातकोत्तरपरीक्षां स्वीकृत्य उन्नतश्रेण्यामुत्तीर्णोऽभवत् । तत्र गणितं-संस्कृतम्-इतिहासः-दर्शनम्- आङ्ग्लभाषा-विज्ञानं-तत्त्वज्ञानम् इति आहत्य सप्तविषयाः स्वीकृताः आसन् । स्वस्य विंशतितमे वर्षे एव एतादृशज्ञानं संसाध्य शैक्षणिकक्षेत्रे अद्याप्युल्लेखार्हस्थानमलभत ।

३. अध्ययनानन्तरमेषः महान् पण्डितः राजमहेन्द्रिनगरे राष्ट्रियमहाविद्यालये प्राध्यापकरूपेण कार्यं निरवहत् । अध्यात्मविषये आकृष्टः एषः शृङ्गेरिशारदापीठमागत्य श्रीश्रीश्री सच्चिदानन्दशिवाभिनवनृसिंहभारती स्वामिनाम् सन्निधाने अध्ययनम् आरभत ।अनन्तरं क्रि.श.१९१९ तमे वर्षे सन्न्यासाश्रमं स्वीकृतवान् । ततः आरभ्य वेङ्कटरमणसरस्वतीम होदयः श्रीश्रीश्रीभारतीकृष्णतीर्थस्वामिमहाभागः इत्येव प्रथितः । शृङ्गगिरावेवाष्टवर्षपर्यन्तमरण्यमध्ये तपस्तप्तवतः एतस्य ध्यानावस्थायां वेदगणितस्य सूत्राणां साक्षात्कारोऽभवत् । अनन्तरमेषः अथर्ववेदेषु गणितविषये स्थितान् विविधशब्दानुपयुज्य षोडशमुख्यसूत्राणां संशोधनमकरोत् । सूत्राण्येतान्युपयुज्य बीजगणितस्य अङ्कगणितस्य रेखागणितस्य वा समस्याः अतीवसरलरूपेण परिहर्तुं शक्यन्ते । अपि च सूत्रसाहाय्येन- मनस्येव गणनं कृत्वा उत्तरं वक्तुं प्रभवामः ।

४. क्रि.श.१९२५ तमे वर्षे पुर्यां गोवर्धनपीठस्य श्रीश्रीश्री मधुसूदनानन्दतीर्थ स्वामिमहाभागः अस्वस्थोऽभवत् । तदा श्रीभारतीकृष्णतीर्थस्वामिम

©KTBS Not to be republished

हाभागः भक्तानामपेक्षया गोवर्धनपीठं समलङ्कृतवान् । ततश्च देशपर्यटनं कृत्वा भारतीयसनातनधर्मस्य प्रचारमकरोत्। क्रि.श. १९५८ तमे वर्षे अमेरिकाविश्वविद्यालयेषु वेदगणितविषये धार्मिकविषये भारतीयसंस्कृतिविषये च उपन्यासं कृत्वा द्वितीय- विवेकानन्दः इति प्रसिद्धिं प्राप्नोत्। यदा मुनिवर्यः भारतमागच्छत् तदा स्वविरचितः विवरणात्मकः षोडश-सूत्रव्याख्यानग्रन्थः नष्टो जातः इति विषयः अवगतः। सततप्रवासेन निरन्तरकार्येण च श्रान्तः यतिश्रेष्ठोऽयं दृष्टिदोषयुक्तोऽपि पुनरेकं ग्रन्थमरचयत्। अद्यापि 'वेदिक् मेथमेटिक्'' इति आङ्ग्लभाषायां सः ग्रन्थः लभ्यते ।

५. भारतीयसंस्कृत्या सह विज्ञानविषये गणितविषये च स्वामिनः योगदानमसदृशं वर्तते । एतस्य वाक्चातुर्यं, मेधाशक्तिम्, उन्नतविचारधारां चावलोक्य न केवलं भारतीयाः अपि तु विदेशीयाः अपि आकर्षिताः अभवन् । एतादृशः महा पुरुषः क्रि.श.१९६० तमे वर्षे फेब्रवरि- मासस्य द्वितीयदिनाङ्के परं धाम प्राप्नोत् ।

यथा शिखा मयूराणां नागानां मणयो यथा।
तद्वद्वेदाङ्गशास्त्राणां गणितं मूर्धनि स्थितम्।।

****

## अभ्यासः

**१. एकवाक्येन उत्तरं लिखत ।**

१. शून्यान्वेषणप्राज्ञाः के?

२. श्रीभारतीकृष्णतीर्थस्वामिमहाभागः किमिति प्रसिद्धःअभवत् ?

३. वेदगणितस्य कः ग्रन्थः आङ्ग्लभाषायां लभ्यते ?

©KTBS Not to be republished

४. वेङ्कटरमणं मद्रास् संस्कृतसङ्घः केन उपाधिना सममानयत् ?

५. प्राचीनकाले प्रसिद्धाः गणितज्ञाः के?

**२. लिङ्गविभक्तिवचनानि लिखत ।**

१. एतस्य २. पित्रा ३. गुरोः ४. मनसि

**३. लकारपुरुषवचनानि लिखत ।**

१. अकथयत् २. विराजते ३. आसन् ४. प्रभवामः

**४. वाक्ये योजयत ।**

१. समाप्य २. तपः ३. सकाशात् ४. यदा-तदा

**५. सन्धिं विभज्य नाम लिखत ।**

१. भारतादेव २. वेदेष्वन्तर्गतः ३. शृङ्गगिरावेव ४. एवेति

**६. समानार्थकपदं लिखत ।**

१. प्राज्ञः २. प्रथितः ३. मूर्धा ४. वरेण्यः

**७. विरुद्धार्थकपदं लिखत ।**

१. प्राचीना २. उन्नतिः ३. उत्तीर्णः ४. स्वीकृतवान्

**८. प्रश्ननिर्माणं कुरुत (रेखाङ्कितपदमुद्दिश्य)**

१. स्वामिवरेण्यः तिन्नवेलिग्रामे अजायत ।

२. सूत्राणां साक्षात्कारोऽभवत् ।

३. मनसि एव गणनं कृत्वा उत्तरं वक्तुं प्रभवामः ।

**९. वाक्यदोषं परिहरत ।**

१. गणितपरम्परा प्राचीनः अस्ति ।

©KTBS Not to be republished

२. सप्तविषयाः स्वीकृताः आसीत् ।

**१०. दशवाक्यैः संस्कृत भाषया, कन्नड भाषया आङ्ग्ल भाषया वा उत्तरं लिखत ।**

१. श्रीवेङ्कटरमणसरस्वतीमहोदयस्य विद्याभ्यासविषयं विवृणुत ।

२. श्रीवेङ्कटरमणसरस्वतीमहोदयः सन्यासाश्रमस्वीकारानन्तरं किं किम् अकरोत्?

## अवधेयांशः

## वेदगणितस्य षोडश सूत्राणि

| | |
|---|---|
| १. एकाधिकेन पूर्वेण । | २. निखिलं नवतः चरमं दशतः। |
| ३. ऊर्ध्वतिर्यग्भ्याम् । | ४. परावर्त्य योजयेत् । |
| ५. शून्यं साम्यसमुच्चये | ६. आनुरूप्ये शून्यमन्यत् । |
| ७. सङ्कलन-व्यवकलनाभ्याम् | ८. पूरणापूरणाभ्याम् । |
| ९. चलनकलनाभ्याम् । | १०. यावदूनम् । |
| ११. व्यष्टिसमष्टिः । | १२. शेषाण्यङ्केन चरमेण । |
| १३. सोपान्त्यद्वयमन्त्यम् । | १४. एकन्यूनेन पूर्वेण । |
| १५. गुणितसमुच्चयः । | १६. गुणकसमुच्चयः । |

**उपसूत्राणि**

| | |
|---|---|
| १. आनुरूप्येण । | २. शिष्यते शेषसंज्ञः । |
| ३. आद्यमाद्येनान्त्यमन्त्येन । | ४. केवलैः सप्तकं गुण्यात् । |
| ५. वेष्टनम् । | ६. यावदूनं तावदूनम् । |

७. यावदूनं तावदूनीकृत्य वर्गं च योजयेत् ।

©KTBS Not to be republished

८.  अन्त्ययोर्दशकेऽपि ।          ९. अन्त्ययोरेव ।

१०. समुच्चयगुणितः ।          ११. लोपनस्थापनाभ्याम् ।

१२. विलोकनम् ।          १३. गुणितसमुच्चयः समुच्चयगुणितः।

१४. ध्वजाङ्कः ।

**उदाहरणम् ।**

- एकाधिकेन पूर्वेण  सङ्ख्यायाः अन्ते पञ्च सङ्ख्या
  यत्र भवति तत्रैव वर्ग (Square) करणार्थमिदं सूत्रमुपयुज्यते ।

  $35^2 =$ 3x (3+1)  ↑$5^2$

  3x4  ↑5x5

  12  25  उत्तरम् = 1225

  $205^2 =$ 20x(20+1)  ↑$5^2$

  20x21  ↑5x5

  420  25  उत्तरम् = 42025

- ऊर्ध्वतिर्यग्भ्याम्  इदं सूत्रं गुणनक्रियायामुपयुज्यते ।
  ऊर्ध्व - ↑ (Vertical)          तिर्यक् - ⤫ (Cross)



34  (5x3)  ( 5x4+2x3)  (2x4)

x52  15  26  8

1768

©KTBS Not to be republished

86
x67 (6x8) (6x6) + (7x8) 7x6

48 92 42

5762

हे राजन् तव मन्दिरे यदि नरो यं कञ्चनाङ्कं वदेत्
तं रामैर्गुणितं विलोचनयुतं दिग्भिर्हतं कारयेत्।
तिथ्याप्तश्च पुनश्च शेषमिह तं तद्विंशतिघ्नं कुरु
तावत्त्वं धनधान्यसन्ततियुतो राज्यं चिरं पालयेः।।

ऊहितः अङ्कः-४
४ × ३ (रामैः गुणितम्)= १२
१२ + २ (विलोचनयुतम्)=१४
१४ × १० (दिग्भिः हतम्) = १४०
१४० ÷१५ (तिथ्याप्तम्) = ०५ (शेषम्)
०५ × २० (विंशतिघ्नम्)=१००

****

©KTBS
Not to be republished

# क्रियाकलापः

## कृदन्तरूपाणि

शतृ प्रत्ययान्तवर्तमानकृदन्तरूपम् (परस्मैपदिधातूनाम्)

| धातुः प्रत्ययः | - | पुँल्लिङ्गे | स्त्रीलिङ्गे | न.लिङ्गे |
|---|---|---|---|---|
| पठ् + शतृ | - | पठन् | पठन्ती | पठत् |
| पूर्णं कुरुत | - | | | |
| लिख् + शतृ | - | ________ | ________ | ________ |
| ____ + ____ | - | क्रीडन् | क्रीडन्ती | क्रीडत् |
| चल् + ____ | - | चलन् | चलन्ती | चलत् |
| ____ + ____ | - | पतन् | पतन्ती | पतत् |

शानच् प्रत्ययान्त- वर्तमानकृदन्तरूपम् (आत्मनेपदिधातूनाम्)

| | | | |
|---|---|---|---|
| वन्द् + शानच् | वन्दमानः | वन्दमाना | वन्दमानम् |
| पूर्णं कुरुत । | | | |
| भाष् + ____ | भाषमाणः | भाषमाणा | भाषमाणम् |
| ____ + शानच् | सहमानः | ________ | ________ |
| वृध् + ____ | ________ | ________ | ________ |
| ____ + ____ | राजमानः | राजमाना | राजमानम् |

क्तान्त भूतकृदन्तरूपम् (कर्मणि अर्थे भावार्थे च)

| धातुः प्रत्ययः | - | पुँल्लिङ्गे | स्त्रीलिङ्गे | न.लिङ्गे |
|---|---|---|---|---|
| पठ् + क्त | - | पठितः | पठिता | पठितम् |
| पूर्णं कुरुत । | | | | |
| लिख् + ____ | - | लिखितः | लिखिता | ________ |
| ____ +क्त | - | अर्चितः | ________ | अर्चितम् |
| जीव् + ____ | - | जीवितः | जीविता | जीवितम् |
| ____ + ____ | - | खादितः | खादिता | खादितम् |

Not to be republished ©KTBS

क्तवतु प्रत्ययान्तः भूतकृदन्तरूपम् (कर्तरि अर्थे)

| धातुः प्रत्ययः | - | पुँल्लिङ्गे | स्त्रीलिङ्गे | न.लिङ्गे |
|---|---|---|---|---|
| पठ् + क्तवतु | - | पठितवान् | पठितवती | पठितवत् |
| पूर्णं कुरुत | | | | |
| जीव् + क्तवतु | | ________ | ________ | ________ |
| अर्च् + ____ | - | अर्चितवान् | ________ | अर्चितवत् |
| खाद् + क्तवतु | - | खादितवान् | खादितवती | ________ |
| गम् + ____ | - | ________ | गतवती | गतवत् |

## पदबन्धः




* **वामतः दक्षिणम्**

१. सखा इव भाति अयं रविः (२)
२. वाणिज्ये इमौ भवतः एव (४)
३. देवकीनन्दनस्य जन्मतिथिः (३)
५. आदिकाव्यं रचितमनेन (४)
७. वर्णेन वायसः इव, परन्तु मधुरं कूजति (२)
९. हरति इत्यस्य समानार्थकः (३)

* **उपरिष्टात् अधः**

१. जनकमहाराजस्य राजधानी एषा नगरी (३)
३. पाणिनिना रचितोऽयं ग्रन्थः (४)
४. अयं जलचरः जलं विना नैव जीवति (२)
६. नाटके प्रधानः अयं कः? (३)
८. तस्करः करोति (४)
१०. तद् शब्दः तृतीयाविभक्तौ एकवचने (२)

****

©KTBS Not to be republished

### अष्टादशः पाठः

# सौभद्रो ग्रहणं गतः

**पीठिकाः**

भागोऽयं भासमहाकविविरचितपञ्चरात्रम् इति रूपकस्य द्वितीयाङ्कात् स्वीकृतोऽस्ति । पञ्चरात्रम् अङ्कत्रयात्मकं नाटकम् । इदं नाटकं महाभारतस्य उत्तरगोग्रहण विषयं प्रतिपादयति । दुर्योधनस्य यज्ञानन्तरं भीष्मद्रोणकर्णादयः कौरवाश्च विराटस्य गोग्रहणार्थम् आगच्छन्ति । दुर्योधनस्य यज्ञनिमित्तं द्वारकातः आगतः अभिमन्युरपि कौरवैः सह युद्धार्थमागच्छति । समरान्ते भीमेन बन्धितस्य अभिमन्योः पितृभिः सह समागमः भवति ।

**पात्रपरिचयः**

राजा : - विराटराजः, उत्तरकुमारस्य पिता।

भगवान् - धर्मराजः, पाण्डवेषु ज्येष्ठः

बृहन्नला - अर्जुनः, पार्थः

भीमसेनः - धर्मराजस्य अनुजः, वृकोदरः

अभिमन्युः - सुभद्रार्जुनयोः पुत्रः

भटः - सेवकः

सूतः - सारथिः

©KTBS Not to be republished



©KTBS Not to be republished

| | | |
|---|---|---|
| राजा | - | कोऽत्र? |
| भटः | - | (प्रविश्य) जयतु महाराजः । |
| राजा | - | अथ परेष्विदानीं को वृत्तान्तः? |
| भटः | - | अप्रत्यक्षं हि तत्र मे । प्रवृत्तिपुरुषाः कथयन्ति । |
| | | धनुर्घोषं द्रोणस्तदिदमितिबुद्ध्वा प्रतिगतः |
| | | ध्वजे बाणं दृष्ट्वा कृतमिति न भीष्मः प्रहरति । |
| | | शरैर्भग्नः कर्णः किमिदमिति चान्ये नृपतयो |
| | | भयेऽप्येको बाल्यान्न भयमभिमन्युर्गणयति ।। १ |
| भगवान् | - | कथमभिमन्युः प्राप्तः? |
| राजा | - | गच्छ । भूयो ज्ञायताम् वृत्तान्तः । |
| भटः | - | यथाज्ञापयति महाराजः । (निष्क्रम्य - प्रविश्य) जयतु महाराजः। जयतु |

विराटेश्वरः । प्रियं निवेदये महाराजाय । अवजितं गोग्रहणम् । अपयाता धार्तराष्ट्राः ।

राजा - अथ कुमार इदानीं क्व?

भटः - दृष्टपरिस्पन्दानां योधपुरुषाणां कर्माणि पुस्तकमारोपयति कुमारः ।

राजा - अहो श्लाघनीयव्यापारः खल्वयं कुमारः । अथ बृहन्नलेदानीं क्व?

भट - प्रिय निवेदनार्थमभ्यन्तरं प्रविष्टः ।

राजा - बृहन्नला तावदाहूयताम्

भटः - यदाज्ञापयति महाराजः (निष्क्रान्तः)

(ततः प्रविशति बृहन्नला)

बृहन्नला - जयतु भर्ता ।

राजा - बृहन्नले, उच्यतां रणविस्तरः ।

बृहन्नला - श्रोतुमर्हति महाराजः ।

भटः - (प्रविश्य) जयतु महाराजः । अश्रद्धेयं प्रियं प्राप्तम् सौभद्रो ग्रहणं गतः।

भगवान् - बृहन्नले किमेतत्?

बृहन्नला - न जाने तस्य जेतारं बलवान् शिक्षितस्तु सः ।

राजा - कथमिदानीं गृहीतः?

भटः - रथमासाद्य निःशङ्कं बाहुभ्यामवतारितः ।

राजा - केन?

भटः - यः किलैष नरेन्द्रेण विनियुक्तो महानसे ।

बृहन्नला - (अपवार्य) एवमार्यभीमेन परिष्वक्तः न गृहीतः ।

©KTBS Not to be republished

राजा - तेन सत्कृत्य प्रवेश्यतामभिमन्युः । अथ केनायं प्रवेशयितव्यः ?

भगवान् - बृहन्नलया प्रवेशयितव्यः।

राजा - बृहन्नले, प्रवेश्यतामभिमन्युः

बृहन्नला - यथाज्ञापयति महाराजः। (निष्क्रान्तः)

(ततः प्रविशाति भीमसेनः)

भीमसेनः - इत इतः कुमारः । (ततः प्रविशति अभिमन्युः)



बृहन्नला - इत इतः कुमारः ।

अभिमन्युः - अये अयमपरः कः ?

बृहन्नला - (अपवार्य) इममिहानयता किमिदानीमार्येण कृतम् ।

भीमसेनः - (अपवार्य) पश्यत्वेनं द्रौपदीत्याहृतोऽयम् ।

©KTBS Not to be republished

बृहन्नला - (अपवार्य) आर्य अभिभाषणकौतूहलं मे महत् । वाचालयत्वेनमार्यः।

भीमसेनः - बाढम् । अभिमन्यो ।

अभिमन्युः - अभिमन्युर्नाम !

भीमसेनः - रुष्यत्येष मया । त्वमेवैनमभिभाषय ।

बृहन्नला - अभिमन्यो !

अभिमन्युः - कथं कथम्?

नीचैरप्यभिभाष्यन्ते नामभिः क्षत्रियान्वयाः ।
इहायं समुदाचारो ग्रहणं परिभूयते ।। २ ।।

बृहन्नला - अभिमन्यो, सुखमास्ते ते जननी?

अभिमन्युः - कथं कथम्? जननी नाम?

किं भवान् धर्मराजो मे भीमसेनो धनञ्जयः ।
यन्मां पितृवदाक्रम्य स्त्रीगतां पृच्छसे कथाम् ।। ३ ।।

बृहन्नला - अभिमन्यो, अपि कुशली देवकीपुत्रः केशवः ?

अभिमन्युः - कथं तत्र भगवन्तमपि नाम्ना? अथ किम्, अथ किम् कुशली भवता संपृष्टः।

(उभौ परस्परमवलोकयतः )

अभिमन्युः - कथमिदानीं सावज्ञमिव मां हस्यते?

बृहन्नला - न खलु किञ्चित् ।

पार्थं पितरमुद्दिश्य मातुलं च जनार्दनम् ।
तरुणस्य कृतास्त्रस्य युक्तो युद्धपराजयः ।। ४ ।।

अभिमन्युः - अलमात्मस्तवं कर्तुं नास्माकमुचितं कुले ।

©KTBS Not to be republished

हतेषु हि शरान् पश्य नाम नान्यद्भविष्यति ।। ५ ।।

बृहन्नला - एवं वाक्यशौण्डीर्यम् । किमर्थं तेन पदातिना गृहीतः?

अभिमन्युः - अशस्त्रो मामभिगतः ततोऽस्मि ग्रहणं गतः ।

न्यस्तशस्त्रं हि को हन्यादर्जुनं पितरं स्मरन् ।। ६ ।।

बृहन्नला - इत इतः कुमारः । एष महाराजः । उपसर्पतु कुमारः ।

अभिमन्युः - आः कस्य महाराजः?

बृहन्नला - न न, ब्राह्मणेन सहास्ते ।

अभिमन्युः - ब्राह्मणेनेति । भगवन् अभिवादये ।

भगवान् - एह्येहि पुत्र ।

राजा - एह्येहि पुत्र । कथं न मामभिवादयसि? अहो उत्सिक्तः खल्वयं क्षत्रियकुमारः । अहमस्य दर्पप्रशमनं करोमि । अथ केनायं गृहीतः।

भीमसेनः - महाराज, मया ।

अभिमन्युः - अशस्त्रेणेत्यभिधीयताम् ।

भीमसेनः - शान्तं पापम् ।

सहजौ मे प्रहरणं भुजौ पीनांसकोमलौ ।

तावाश्रित्य प्रयुध्येयं दुर्बलैर्गृह्यते धनुः ।। ७ ।।

अभिमन्युः - मा तावद्भोः ।

बाहुरक्षौहिणी यस्य निर्व्याजो यस्य विक्रमः ।

किं भवान् मध्यमस्तातः तस्यैतत् सदृशं वचः ।। ८ ।।

राजा - न ते क्षेपेण रुष्यामि रुष्यता भवता रमे ।

अभिमन्युः - यद्यहमनुग्राह्यः

©KTBS Not to be republished

पादयोः समुदाचारः क्रियतां निग्रहोचितः ।

बाहुभ्यामाहृतं भीमो बाहुभ्यामेव नेष्यति ।। ९ ।।

( सर्वे निष्क्रान्ताः )

**श्लोकतात्पर्यम्-**

**श्लोक-१.** इदं तस्यैव धनुषः ध्वनिः इति ज्ञात्वा द्रोणः निर्गतः । ध्वजे पूतितं बाणं दृष्ट्वा एतेन एव कृतम् इति भीष्मः न युध्यते । यदा कर्णः एव बाणैः घातितः तदा अन्ये राजानः चकिताः । एवं सर्वे भीताः चेत् अभिमन्युः बाल्यावस्थायाः कारणात् भयं न परिगणयति ।

**श्लोक -२** क्षत्रियवंशजान् कुत्सितशब्दैः आह्वयन्ति । अयं एतेषां सम्प्रदायः । यतः सर्वदा बन्धनम् अवमानकरं भवति ।

**श्लोक-३** यथा पिता मातुः योगक्षेमं विचारयति तथा मम मातुः कुशलवार्तां विचारयितुं किं भवान् मम ज्येष्ठपिता धर्मराजः अथवा भीमः उत मम पिता अर्जुनः ?

**श्लोक-४** पितुः पार्थस्य पुत्रः सन् भगवतः वासुदेवस्य भागिनेयः सन् तरुणस्य अस्त्रविद्यानिपुणस्य च तव समरे पराभवः युज्यते वा ?

**श्लोक-५** आत्मप्रशंसा अस्माकं कुले न युक्ता भवति । रणे ये योधाः मृताः तेषां शरीरान्तर्गतान् बाणान् पश्य । तत्र अभिमन्योः नामधेयं एव लिखितम् अस्ति न तु अन्येषाम् ।

**श्लोक-६** सः शस्त्ररहितः भूत्वा मम समीपं आगतवान् । अतः बन्धितः अस्मि। अर्जुनस्य पुत्रः सन् शस्त्रहीनं कथं वा अहं हनिष्यामि ?

**श्लोक-७** स्वाभाविकौ दृष्टपुष्टौ मम भुजौ एव आयुधम् । तौ अश्रित्य अहं युद्धं करोमि । बलहीनाः अस्त्राणि गृहीत्वा युद्धं कुर्वन्ति ।

**श्लोक-८** यस्य पराक्रमः असदृशः यस्य बाहुः एव अक्षौहिणीसमानः तस्य एतत् वचनं युक्तं भवति । तथा वक्तुं भवान् एतादृशपराक्रमसम्पन्नः

©KTBS Not to be republished

मम मध्यम:तात: भीमसेन: वा?

**श्लोक-९** बन्धनोचितसंस्कार: पादयो: क्रियताम् । हस्ताभ्यां आनीतं मां भीमसेन: हस्ताभ्यां एव नयतु ।

**कवेः कालदेशकृतीनां परिचय:**

कवि: - भास: ।

काल: - कालिदासात् पूर्वकालीन: । प्राय: क्रिस्तात् प्राक् षष्ठं शतकम् ।

देश: - प्राय: दक्षिणभारतम् ।

कृतय: - चतुर्दश नाटकानि । अभिषेकनाटकम्, प्रतिमानाटकम् इत्यादयः ।

## अभ्यास:

**१. एकवाक्येन उत्तरं लिखत ।**

१. अभिमन्यु: कथं गृहीत:?

२. भीम: विराटराजेन कुत्र विनियुक्त:?

३. कै: धनु: गृह्यते?

४. अभिमन्यो: मातुल: क:?

**२. रिक्तस्थानं पूरयत ।**

१. अपयाता ____________ ।

२. ____________ ग्रहणं गत: ।

३. सुखमास्ते ते ____________?

४. ____________ परिभूयते ।

५. अपि कुशली ____________ पुत्र: केशव:?

©KTBS
Not to be republished

३. **सम्यक् योजयत ।**

| अ | आ |
|---|---|
| १. अन्वयः | पार्थः |
| २. अभिमन्योः मातुलः | कौरवः |
| ३. धनञ्जयः | उत्तरा |
| ४. सौभद्रः | अभिमन्युः |
| ५. धार्तराष्ट्रः | वंशः |
| | श्रीकृष्णः |

४. **वाक्ये योजयत ।**

१. दृष्ट्वा २. स्मरन् ३. प्रविश्य

५. **पर्यायपदं लिखत ।**

१. राजा २. भुजः

३. वृकोदरः ४. शरः

६. **विरुद्धार्थकपदं लिखत ।**

१. दुर्बलः २. श्लाघ्यः ३. प्रियः

४. निष्क्रम्य

७. **सन्धिं कृत्वा नाम लिखत ।**

१. यत् + आज्ञापयति २. बाल्यात् + न

३. खलु + अयम् ४. न + अन्यत्

८. **विग्रहवाक्यं लिखित्वा समासनाम लिखत ।**

१. क्षत्रियकुमारः २. महाराजः ३. विराटेश्वरः

©KTBS Not to be republished

**९. वाक्यदोषं परिहरत ।**

१. जयतु महाराजा ।

२. अये अयम् अपरः का?

३. कथं त्वं मां न अभिवादयति?

४. भवते धनञ्जयस्य नमः ।

५. ब्राह्मणस्य सह आस्ते ।

**१०. यथा निर्देशं लिखत ।**

१. कि भवान् मध्यमःतातः? तस्यैतत् सदृशं वचः ।

कः पाठः? कः अवदत्? सः मध्यमःतातः कः ?

२. रथमासाद्य निःशङ्कं बाहुभ्याम् अवतारितः ।

कः पाठः? कः अवतारितः? केन अवतारितः?

३. सहजौ मे प्रहरणम्।

कः पाठः? कम् अवदत्? कस्य भुजौ सहजौ प्रहरणम्?

४. कथं कथम्? जननी नाम?

कः पाठः? कः पृच्छति? कम् पृच्छति?

**११. लघूत्तरं लिखत ।**

१. प्रवृत्तिपुरुषाः शत्रूणां वृत्तान्तं कथं कथयन्ति?

२. सौभद्रः कथं ग्रहणं गतः?

**१२. दशवाक्यैः संस्कृत, कन्नड वा आङ्ग्लभाषायां उत्तरं लिखत ।**

१. बृहन्नला - अभिमन्य्वोः सम्भाषणं संगृह्य लिखत ।

****

©KTBS Not to be republished

# अवधेयांशः

**भासनाटकानि** -

| | | | |
|---|---|---|---|
| १) | अभिषेकनाटकम् । | २) | प्रतिमानाटकम्। |
| ३) | मध्यमव्यायोगः । | ४) | दूतवाक्यम् |
| ५) | दूतघटोत्कचम् । | ६) | कर्णभारम् । |
| ७) | ऊरुभङ्गम् । | ८) | पञ्चरात्रम् । |
| ९) | प्रतिज्ञायौगन्धरायणम् । | १०) | स्वप्नवासवदत्तम् । |
| ११) | अविमारकम् | १२) | चारुदत्तम् |
| १३) | यज्ञफलम् । | १४) | बालचरितम् । |

प्रशंसोक्तिः - भासो हासः ।

## प्रसिध्दानि नाटकानि लेखकाश्च ।

| | |
|---|---|
| अभिज्ञानशाकुन्तलम् | कालिदासः |
| उत्तररामचरितम् | भवभूतिः |
| वेणीसंहारः | भट्टनारायणः |
| नागानन्दः | श्रीहर्षः |
| मुद्राराक्षसम् | विशाखदत्तः |

# क्रियाकलापः

१. च इति अव्ययस्य वाक्ये प्रयोगः कथं करणीयः इति अभ्यासं कुरुत ।

राम: कन्नडं संस्कृतं च पठति ।

©KTBS Not to be republished

गणेशः फलं पुष्पं च आनयति ।

अहं रामायणं महाभारतं पुराणं च पठामि ।

मञ्जूषातः क्रियापदानि स्वीकृत्य च इति अव्ययेन सह उदाहरणानुसारं वाक्यानि रचयत ।

(खादति, पठामि, आनयति , लिखसि, पिबति)

उदा - १. रामः कन्नडं संस्कृतं च पठति ।

१. ______________________

२. ______________________

३. ______________________

४. ______________________

**२. संयोज्य लिखत ।**

| | |
|---|---|
| गणितं विज्ञानं च | पिबति |
| नाटकं चलनचित्रं च | खादति |
| फलानि पुष्पाणि च | लिखति |
| शाकाः फलानि च | पठति |
| क्षीरं जलं च | आनयति |
| पत्रं लेखं च | पश्यति |

**३. वाक्यद्वयं संयोज्य एकं वाक्यं कुरुत ।**

उदाः- रामः शालां गच्छति । कृष्णः शालां गच्छति ।

रामः कृष्णः च शालां गच्छति ।

१) गणेशः पाठं पठति । रमेशः पाठं पठति ।

उत्तरम्:- ______________________

©KTBS Not to be republished

२) लता गीतं गायति । गीता गीतं गायति ।

उत्तरम्:- ____________________

३) राजेश: पूजां करोति । महेश: पूजां करोति ।

उत्तरम्:- ____________________

४) राम: वनं गच्छति । सीता वनं गच्छति ।

उत्तरम्:- ____________________

५) लता भोजनं करोति । माता भोजनं करोति ।

उत्तरम्:- ____________________

६) माता फलं खादति । पिता फलं खादति ।

उत्तरम्:- ____________________

७) अग्रज: फलम् आनयति । अग्रजा फलम् आनयति ।

उत्तरम्:- ____________________

अपि शब्दम् उपयुज्य उदाहरणानुसारं वाक्यानि रचयत ।

उदा:- अहं संस्कृतम् अपि पठामि ।

१. ____________________

२. ____________________

३. ____________________

बालक: अपि नगरं गच्छति ।

१. ____________________

२. ____________________

३. ____________________

©KTBS Not to be republished

अहं कुशली अस्मि । अपि कुशली भवान् ?

भवान् देवालयं गच्छति । ______________________

सा जलं पिबति । ______________________

सः नृत्यं करोति । ______________________

इति शब्दमुपयुज्य उदाहरणानुसारं वाक्यानि रचयत ।

उदा:- १ अशोकः इति राजा आसीत् । २.कालिदासः वरकविः इति प्रसिद्धः।

३. भवान् शालां गच्छतु इति माता वदति ।

**एवमेव वाक्यानि रचयत ।**

१. ______________________

२. ______________________

३. ______________________

४. ______________________

५. ______________________

**व्याधस्याचरणं ध्रुवस्य च वयः विद्या गजेन्द्रस्य का**
**का जातिर्विदुरस्य यादवपतेरुग्रस्य किं पौरुषम्।**
**कुब्जायाः कमनीय रूपमपि किं किं तत्सुधाम्नो धनं**
**भक्त्या तुष्यति केवलं न तु गुणैः भक्तिप्रियो माधवः ।।**

**आशा नाम मनुष्याणां काचिदाश्चर्यशृङ्खला ।**
**यया बद्धाः प्रधावन्ति मुक्तास्तिष्ठन्ति पङ्गुवत् ।।**

*****

©KTBS Not to be republished

## नवदशः पाठः

# अलङ्कारः

शब्दार्थसहितौ काव्यम् इति प्रसिद्धः आलङ्कारिकः मम्मटः काव्यस्य लक्षणं प्रतिपादितवान् । काव्यस्य आत्मा रसः । काव्यस्य शरीरं शब्दार्थौ । शब्दार्थयोः सौन्दर्यं वर्धयितुं कविः अलङ्कारान् प्रयुङ्क्ते । अलङ्काराः काव्यशोभावर्धकाः । ते द्विविधाः - शब्दालङ्कारः अर्थालङ्कारश्चेति । काव्यसौन्दर्यवर्धकः शब्दविन्यासक्रमः शब्दालङ्कारः । काव्यसौन्दर्यवर्धकः अर्थवर्णनक्रमः अर्थालङ्कारः ।

©KTBS Not to be republished

## शब्दालङ्कारः

### १. अनुप्रासः

लक्षणम्: - एकस्यैव व्यञ्जनस्य अनेकावृत्तिः अनुप्रासः ।

यथा - अयिगिरिनन्दिनि नन्दितमेदिनि विश्वविनोदिनि नन्दनुते । अत्र 'द' कारस्य न कारस्य च अनेकावृत्तिः भवति । अतः अत्र अनुप्रासालङ्कारः।

यथा वा - दूरीकरोतु दुरितं गौरीचरणपङ्कजम् ।
अत्र र इत्यक्षरस्य अनेकावृत्तिः भवति ।

### २. यमकः

लक्षणम् - एकस्यैव शब्दस्य अनेकावृत्तिः यमकः ।

यथा - शारदा शारदाम्बोजवदना वदनाम्बुजे ।
सर्वदा सर्वदास्माकं सन्निधिः सन्निधिं क्रियात् ।।

अत्र शारदा इति शब्दस्य, वदना इति शब्दस्य, सर्वदा इति शब्दस्य च अनेकावृत्तिः भवति । अतः अत्र यमकालङ्कारः ।

यथा वा - अगजानन पद्मार्कं गजाननमहर्निशम् ।
अनेकदन्तं भक्तानाम् एकदन्तमुपास्महे ।।

# अर्थालङ्कारा:

## १. उपमालङ्कार:

लक्षणम् - **उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयो: ।**

यत्र उपमेयोपमानयो: द्वयो: वस्तुनो: सादृश्यसौन्दर्यं वर्ण्यते तत्र उपमालङ्कार: भवति । उपमालङ्कारे उपमेय:, उपमानम्, साधारणधर्म:, उपमावाचकपदम् चेति चत्वार: अंशा: भवन्ति। वर्ण्यं वस्तु उपमेय:। येन सादृश्यं वर्ण्यते तत् उपमानम्। उपमेयोपमानयो: समानो धर्म: साधारणधर्म: । इव आदय: उपमावाचका: शब्दा: ।

यथा - **अम्भोरुहमिवाताम्रं मुग्धे करतलं तव**। अत्र उपमेयोपमानयो: मुग्धाकरतल-अम्भोरुहयो: सादृश्यं वर्णितम् । अत: अत्र उपमालङ्कार:। अत्र मुग्धाया: करतलम् उपमेय: । अम्भोरुह: उपमानम्। आताम्रत्वं (रक्तत्वम्) समानधर्म: । इव इति उपमा वाचकशब्द:।

यथा १. विद्वन् तव वाणी सुधेव मधुरा ।

## २. रूपकालङ्कार:

लक्षणम् - **उपमेयोपमानयो: अभेद: रूपकम्** । यत्र उपमेयोपमानयो: अभेद: (एकत्वम्) वर्ण्यते, तत्र रूपकालङ्कार: भवति ।

यथा - मुखचन्द्रो विराजते ।

अत्र उपमेयोपमानयो: मुखचन्द्रयो: अभेद: वर्णित: । अत: अत्र रूपकालङ्कार: ।

यथा वा - विद्याधनं सर्वधनप्रधानम् ।

अत्र विद्या एव धनम् इति वर्णनेन उपमेयोपमानयो: विद्याधनयो: अभेद: वर्णित: । अत: अत्र रूपकालङ्कार: ।

******

©KTBS Not to be republished

## अभ्यासः

**१. अलङ्कारं विवृणुत ।**

१. श्रीरामः सागर इव गम्भीरः ।

२. मुखं कमलमिव सुन्दरम् ।

३. चरणारविन्दम् ।

४. विद्याधनं सर्वधनप्रधानम् ।

**२. रिक्तस्थानं पूरयत ।**

१. अलङ्काराः ______________ वर्धकाः ।

२. एकस्य व्यञ्जनस्य ______________ अनुप्रासः ।

३. वर्ण्यं वस्तु ______________ ।

४. येन सादृश्यं वर्ण्यते तत् ______________ ।

५. उपमानोपमेययोः ______________ रूपकम् ।

**राज्याभिषेके मदविह्वलायाः**
**हस्ताच्च्युतो हेमघटो युवत्याः ।**
**सोपनमार्गेषु करोति शब्दं**
**टटं टटटं टटटं ट टंटः ।।**

****

Not to be republished ©KTBS

## विंशतिः पाठः

# छन्दः

श्लोके अक्षराणां पदानाञ्च नियतविन्यासरीतिः एव छन्दः । छन्दश्शास्त्रस्य आद्यः प्रवर्तकः भगवान् पिङ्गलाचार्यः ।

यत्र नियतानि अक्षराणि अवलम्ब्य श्लोकः विरच्यते तत्र अक्षरछन्दः इति व्यवहारः वर्तते ।

प्रत्येकस्मिन् श्लोकपादे लक्षणानुगुणं नियतानि अक्षराणि भवन्ति । एतानि ह्रस्व-दीर्घभेदेन लघु-गुरुसंज्ञां प्राप्नुवन्ति ।

- ह्रस्वस्वरः, ह्रस्वस्वरयुक्तं व्यञ्जनं च लघुः भवति । लघुचिह्नम् '∪'.

  ∪ ∪ ∪ ∪ ∪ ∪ ∪ ∪

  यथा - अ, इ, उ, ऋ, क, जि, भु, कृ

- दीर्घस्वरः, दीर्घस्वरयुक्तं व्यञ्जनं च गुरुः भवति ।

  गुरुचिह्नम् '—'

  यथा - आ, ई, ऊ,ॠ, ए, ऐ, ओ, औ, पा, पी, पू, पॄ,पे, पै पो, पौ,

- विसर्गयुक्तम्, अनुस्वारयुक्तं चाक्षरं गुरुः भवति ।

  यथा - कः , कं

- संयुक्ताक्षरस्य पूर्वस्थितम् अक्षरं गुरुः भवति ।

  यथा - चन्द्रः, अस्ति, तक्षकः

- पादान्तस्थाने विद्यमानं ह्रस्वाक्षरं गुरुचिह्नं वा प्राप्नोति ।

लघुगुरुणाम् अवस्थितिम् अनुसृत्य अष्ट गणाः भवन्ति । त्रयाणां अक्षराणाम् एकगणः भवति ।

©KTBS Not to be republished

**अष्टगणाः य-र-त-भ-ज-स-म-न ।**

आदिमध्यावसानेषु **यरता** यान्ति लाघवम् ।
**भजसा** गौरवं यान्ति **मनौ** तु गुरुलाघवम् ।।
अत्र गणसूचकं सुलभं सूत्रमपि वर्तते ।

**यमाताराजभानसलगम्**

∪ – –
१. यमाता = यगणः यशोदा

– – –
२. मातारा = मगणः रामेभ्यः

– – ∪
३. ताराज = तगणः जानाति

– ∪ –
४. राजभा = रगणः भारती

∪ – ∪
५. जभान = जगणः ददाति

– ∪ ∪
६. भानस = भगणः राजति

∪ ∪ ∪
७. नसल = नगणः भवति

∪ ∪ –
८. सलगम् = सगणः विधिना

१. **यरत** गणाः

१. आदिलघुः = यगणः = ∪ - -
२. मध्यलघुः = रगणः = - ∪ -
३. अन्त्यलघुः = तगणः = - - ∪

२. **भजस** गणाः

४. आदिगुरुः = भगणः = - ∪ ∪
५. मध्यगुरुः = जगणः = ∪ - ∪
६. अन्त्यगुरुः = सगणः = ∪ ∪ -

३. **मन** गणौ

७. सर्वगुरुः = मगणः = - - -
८. सर्वलघुः = नगणः = ∪ ∪ ∪

## १. अनुष्टुप्

अनुष्टुभि प्रतिपादम् अष्टाक्षराणि । अत्र चतुर्ष्वपि पादेषु पञ्चमं लघुः, षष्ठं च गुरुः, प्रथमतृतीयपादयोः सप्तमाक्षरं गुरुः, द्वितीयचतुर्थपादयोः सप्तमाक्षरं लघुः।

सामान्यतया छन्दसि यत् लक्षणवाक्यं भवति तदेव उदाहरणवाक्यमपि भवति।

©KTBS
Not to be republished

**लक्षणम् -**

∪ —    ∪–∪

पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः ।

∪ – –    ∪–∪

गुरुषष्ठं च पादानाम् चतुर्णां स्यादनुष्टुभि ।।

**उदाः-**

असहायः पुमानेकः कार्यान्तं नाधिगच्छति ।
तुषेणापि विनिर्मुक्तः तण्डुलो न प्ररोहति ।।

## २. इन्द्रवज्रा

अत्र प्रतिपादम् एकादशाक्षराणि भवन्ति । त-त-ज गणाः गुरुद्वयञ्च ।

**लक्षणम् -**

| त | त | ज | गुरुः गुरुः |
|---|---|---|---|
| – – ∪ | – – ∪ | ∪ – ∪ | – – |
| स्यादिन्द्र | वज्रा य | दि तौ ज | गौ ग: |

उदाः-

१. विद्वान् कुलीनो न करोति गर्वम् ।
२. सम्पूर्णकुम्भो न करोति शब्दम्।

## अभ्यासः

**१. एकवाक्येन उत्तरं लिखत ।**

१. छन्दश्शास्त्रस्य आद्यः प्रवर्तकः कः ?
२. गणे कति अक्षराणि भवन्ति ?
३. कति गणाः भवन्ति ?
४. इन्द्रवज्रावृत्ते प्रतिपादं कति अक्षराणि भवन्ति ?

**२. लघूत्तरं लिखत ।**

१. अनुष्टुप् छन्दसः लक्षणं लिखत ।
२. इन्द्रवज्रावृत्तस्य लक्षणं लिखत ।

©KTBS Not to be republished

## ३. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दसः नाम लिखत ।

१. अर्धो घटो घोषमुपैति नूनम् ।

२. वक्रतुण्ड महाकाय कोटिसूर्य समप्रभ ।

## क्रियाकलापः

| | | | | | | |
|---|---|---|---|---|---|---|
| 1 | | 2 | ■ | 3 | | 4 |
| | ■ | 5 | | | ■ | |
| 6 | 7 | | ■ | 8 | 9 | |
| ■ | | ■ | ॐ | ■ | | ■ |
| 10 | | 11 | ■ | 12 | | 13 |
| | ■ | 14 | | | ■ | |
| 15 | | | ■ | 16 | | |

### ✻ वामतः दक्षिणम्

१. गजस्य पादं एषः गृहीतवान् । (३)

३. भूपपण्डितसभ्यानां कान्तः एषः । (३)

५. पुनरपि मरणं पुनरपि ...... । (३)

६. पितुः पर्यायः । (३)

८. अधो लोकः । (३)

१०. अन्ते नद्वययुक्तं अरण्यम् । (३)

१२. अत्र सरोवरः साकारः भविष्यति । (३)

१४. श्री भारतीतीर्थस्वामिनः अस्मिन् विषये परिणताः आसन् । (३)

१५. शरमध्ये ककारोऽस्ति अथापि शिवः। (३)

१६. अपरं रौप्यम् । (३)

### ✻ उपरिष्टात् अधः

१. जन्मशतेषु पुण्यतमं जन्म । (३)

२. एषः वस्त्राणि क्षालयति । (३)

३. न,न एतत् मुखम् अस्ति । (३)

४. रङ्गमञ्चे एषः हस्तपादं चालयति। (३)

७. सर्वत्रापि नूतनः । (३)

९. अधस्तात् आगच्छतु समुद्रः मिलति।(३)

११. अस्मिन् पत्तने गरः अस्ति । (३)

१२. युध्दे कः पलायते ? (३)

१३. मेघध्वनेः अपरं नाम ।

✻✻✻✻

©KTBS
Not to be republished

# एकविंशः पाठः

## पत्रलेखनम्

- **पितरं प्रति पत्रम् ।**

।।श्रीः।।

क्षेमम् — कार्कलम्

०२-१-२०१७

पूज्यपितृचरणानां सन्निधौ प्रणामाः ।

अहम् अत्र कुशली/कुशलिनी अस्मि । भवन्तः सर्वेऽपि तत्र कुशलिनः इति मन्ये ।

अहं सम्यक् पठन् / पठन्ती अस्मि । आगामिनि मासे हम्पे,

बिजापुरम् इत्यादिक्षेत्रसन्दर्शनार्थं मम मित्राणि गमिष्यन्ति । अहम् अपि गन्तुम् इच्छामि । एतदर्थं कृपया एकसहस्ररूप्यकाणि प्रेषयन्तु इति सविनयं प्रार्थयामि। प्रवासात् आगमनानन्तरं पत्रं लेखिष्यामि ।

पत्रम् लिखन्तु ।

इति भवदीयः/या पुत्रः/पुत्री

सुकेशः/सुनीता

पत्रसङ्केतः

सकाशात्,

____________________

____________________

____________________

सविधे,

____________________

____________________

____________________

©KTBS Not to be republished

- **मित्रं प्रति पत्रम् ।**

।।श्रीः।।

क्षेमम् मैसूरु

०४-१-२०१७

प्रियमित्र ! नमस्ते ।

अत्राहं कुशली/कुशलिनी । त्वमपि कुशली / कुशलिनीति भावयामि ।

अस्माकं शालायाः वार्षिकोत्सवः २०-११-२०१७ दिने प्रचलिष्यति । तदा सांस्कृतिककार्यक्रमाः भविष्यन्ति । तस्मिन् कार्यक्रमे अहमपि भागं वहामि । भवान् / भवती अपि कार्यक्रमार्थम् अवश्यम् आगच्छतु । अन्यः विशेषः नास्ति । पत्रं लिखतु।

इति भवदीयः/या प्रियसखः/सखी

परमेशः / पवित्रा

पत्रसङ्केतः

सकाशात्,

______________________
______________________
______________________

सविधे,

______________________
______________________
______________________

©KTBS Not to be republished

● **नगरपालिकां प्रति पत्रम् ।**

सकाशात्,

श्री बि.रायण्णः,

भासमार्गः,

श्रीनिवासपुरम्,

हासनम् ।

सविधे,

प्रबन्धप्रमुखः,

नगरपालिका कार्यालयः,

मुख्यमार्गः,

हासनम् ।

मान्याः,

विषयः - स्वच्छतापालनार्थं निवेदनम् ।

सप्ताहद्वयतः अत्र कुजलकुल्यातः बहिः जलं निस्सरति । तेनायं प्रदेशः दुर्गन्धेन व्याप्तः । मार्गेषु जलप्रवाहकारणात् जनानां गमनागमनमपि कष्टकरं सञ्जातम् ।

अतः शीघ्रं समुचितां व्यवस्थां कुर्वन्तु इति सविनयं प्रार्थयामि ।

धन्यवादेन सह,

दिनाङ्कः ०५-१-२०१७ भवदीयः

स्थलम् - हासनम् बि.रायण्णः

**अभ्यासः**

१. दिनद्वयं विरामं सम्प्रार्थ्य मुख्योपाध्यायं प्रति विरामपत्रं लिखत

२. पुस्तकप्रेषणाय आवेदनपत्रं लिखत ।

****

©KTBS Not to be republished

# द्वाविंशः पाठः

## प्रबन्धाः

कमपि विषयमधिकृत्य व्यवस्थितरूपेण प्रस्तुतीकरणमेव प्रबन्धः । प्रकृष्टैः वाक्यैः बध्यते (विषयः) इति प्रबन्धः । प्रबन्धरचनाकला विषयज्ञानं निरूपणाशक्तिं च अपेक्षते। वाक्यानि सरलानि, अर्थगर्भितानि च भवेयुः । सामान्यतः प्रबन्धः गद्यरूपे भवति । प्रबन्धस्तु लेखकस्य विचारशक्तेः कल्पनाशक्तेः निरूपणाशक्तेः च द्योतकः ।

हृद्यःप्रबन्धः वाचकस्य मनःपीडां परिहरति । प्रबन्धपठने आसक्तिरपि वर्धते ।

प्रबन्धेषु प्रस्तावः - विषयनिरूपणम्-उपसंहारः इति त्रयः अंशाः प्रमुखाः भवन्ति ।

### १. स्वातन्त्र्योत्सवः

भारतीयाः वयमिदानीम् स्वतन्त्रभारते निवसामः । क्रि.श.१९४७ तमे वर्षे अगस्ट्मासस्य पञ्चदशदिनाङ्के अस्माकं राष्ट्रं भारतं स्वतन्त्रम् अभवत् । ततः पूर्वम् आङ्ग्लाः द्विशतं वर्षाणि यावत् अस्माकं देशस्य प्रशासनं कृतवन्तः । भारतीयेभ्यः असहनीयं कष्टं दत्तवन्तः । अतः भारतीयाः तेषां विरुद्धम् आन्दोलनमेव कृतवन्तः। तस्य परिणामात् भारतीयाः आङ्ग्लशासनात् विमुक्ताः अभवन् । अस्य स्वातन्त्र्यदिनस्य स्मरणार्थं वयं प्रतिवर्षम् उत्सवम् आचरामः।

अस्मिन् दिने राष्ट्रध्वजस्य राष्ट्रगीतस्य च गौरवं समर्पयन्ति । स्वातन्त्र्यवीराणां साहसं सम्पर्कमाध्यमेषु प्रसारयन्ति । इदानीं स्वतन्त्रभारतस्य प्रगतिः अस्माभिः करणीया। कीर्तिः प्रसारणीया । तदैव अस्माकं जीवनं धन्यं भविष्यति । वन्दे भारतमातरम् ।

©KTBS Not to be republished

## २. दूरदर्शनम्

प्रपञ्चे नैके सम्पर्कमाध्यमाः वर्तन्ते । आकाशवाणी, दूरदर्शनम्, वार्तापत्रिका, दूरवाणी, अन्तर्जालम् इत्यादयः प्रमुखाः सम्पर्कमाध्यमाः सन्ति । एतेषु दूरदर्शनस्य महत् स्थानमस्ति। दूरदर्शनस्य संशोधकः जे.एल.बयार्ड महोदयः । दूरदर्शने दर्शनं श्रवणञ्च समकालमेव भवति । तस्मात् अद्यत्वे दूरदर्शनं बहुजनप्रियं प्रधानं च सम्पर्कसाधनमभवत् ।

दूरदर्शनद्वारा गृहे एव उपविश्य राज्यस्य राष्ट्रस्य विश्वस्य च विषया द्रष्टुं श्रोतुं च शक्यन्ते । विविधभाषासु सर्वकारीयवाहिन्यः अन्यवाहिन्यः च भवन्ति । दूरदर्शने चलच्चित्रम्, सन्दर्शनम्, प्रतिभाप्रदर्शनकार्यक्रमाः, सामाजिककार्यक्रमाः अपि प्रसार्यन्ते । एवमनेन न केवलं मनोरञ्जनम् अपि तु बुद्धिविकासोऽपि भवति।

दूरदर्शने प्रसार्यमाणाः केचन कार्यक्रमाः छात्राणां युवकानां च मनसि दुष्परिणामं जनयन्ति । निरन्तरं दूरदर्शनवीक्षणेन आलस्यं नेत्रदोषादिकं च भवितुमर्हति । तस्मात् लाभालाभौ विज्ञाय दूरदर्शनस्य उपयोगः कर्तव्यः ।

## ३. गणराज्योत्सवः

भारतीयाः प्रतिवर्षं बहून् उत्सवान् आचरन्ति । तत्र केचन उत्सवाः धार्मिकाः अन्ये केचन राष्ट्रियाः । राष्ट्रियोत्सवेषु गणराज्योत्सवोऽपि अन्यतमः । जनवरिमासस्य षड्विंशतितमे दिनाङ्के प्रतिवर्षं गणराज्योत्सवः आचर्यते ।

क्रि.श.१९३० तमे वर्षे जनवरि, मासस्य २६ दिनाङ्के लाहोरनगरे एकमधिवेशनमभवत् । तत्र देशं परकीयेभ्यः विमोचयितुं प्रतिज्ञा कृता आसीत् । तद्दिनं स्वाधीनतादिवसः इति प्रतिवर्षम् आचर्यते स्म । स्वातन्त्र्यानन्तरम् अस्मिन् दिने एव नूतनसंविधानं स्वीकृतम् । डा।। अम्बेड्करमहोदयः संविधानरचनासमितेः अध्यक्षः आसीत् ।

©KTBS Not to be republished

गणरज्योत्सवदिने सर्वत्र देशे राष्ट्रध्वजारोहणं कृत्वा ध्वजवन्दनं कुर्वन्ति। प्रतिराज्यं राजधान्याम् अन्यत्र च पथिसञ्चलनम् आकर्षकरूपेण प्रचलति । विभिन्नक्षेत्रेषु विशिष्टसेवां कृतवद्भ्यः गण्येभ्यः प्रशस्तिः प्रदीयते ।

## ४. जनसङ्ख्यास्फोटः

अल्पकाले एव जनानाम् अनियमिता वृद्धिरेव जनसङ्ख्यास्फोटः इत्युच्यते ।

**कारणानि** - एकविंशतिशतकेऽस्मिन् अपि बहुत्र दृश्यते बाल्यविवाहः । वैद्यकीयविज्ञानस्य प्रगत्या मरणप्रमाणं न्यूनं जातम् । अज्ञानेन अन्धश्रद्धया च नैके जनाः सन्ताननियन्त्रणं न जानन्ति नाङ्गीकुर्वन्ति च । इतरदेशेभ्यः आगतानाम् असङ्ख्याकानां निराश्रितानां कृते आश्रयः दत्तः भारतेन । जनसङ्ख्यानियन्त्रणे अनासक्तिः दृश्यते केषुचित् जनेषु।

**परिणामाः** - देशस्य प्रगतये निर्मिताः समस्तयोजनाः विफलाः भवन्ति । जीवनावश्यकवस्तूनाम् अभावः न्यूनता वा भवति । अरण्यानां विनाशः, कृषिभूमिनाशः, परिसरप्रदूषणं च प्रवर्धते । वञ्चनं, हननं, भ्रष्टाचारः, इत्यादिसमाजविरोधीनि कार्याणि सम्भवन्ति। बाधन्ते च जनान् निरुद्योगः, निरक्षरता, अनारोग्यं, दारिद्र्यम् इत्यादिसमस्याः।

**निवारणोपायाः**- बाल्यविवाहस्य दुष्परिणामस्य कुटुम्बयोजना शासनस्य प्रचारः करणीयः

*****

©KTBS Not to be republished

## त्रयोविंशः पाठः

# अनुवादाः

**कन्नडभाषया, आङ्ग्लभाषया वा अनुवादं कुरुत।**

१. नीलमेघः आकाशे सञ्चरति । मेघात् वृष्टिः भवति । वृष्ट्या भूमौ सस्यानि वर्धन्ते । पशवः सस्यानि भक्षयित्वा जीवन्ति ।

२. युष्माभिः सम्यक् अभ्यासः करणीयः ।गुरोः मार्गदर्शनम् अनुसरत । श्वः शालायां परीक्षा प्रचलिष्यति । सम्यक् लिखित्वा उत्तीर्णाः भवत । उद्योगिनं पुरुषसिंहम् उपैति लक्ष्मीः ।

३. कृषीवलाः क्षेत्रे परिश्रमेण कृषिकार्यं कुर्वन्ति । तेषां गृहेषु कुक्कुटाः, सारमेयाः, गावः, च भवन्ति । शुनकः गृहं क्षेत्रं च चोरेभ्यः रक्षति । धेनुः मधुरं दुग्धं ददाति ।

४. आगामिवासरे सुधांशुः वैद्यकीयक्षेत्रे उन्नताध्ययनार्थं विदेशं प्रति गमिष्यति । तत्र वर्षत्रयं सम्यगधीत्य पुनरागमिष्यति । प्रतिग्रामं गत्वा आर्तान् सेविष्यते । यतः सेवा हि परमो धर्मः ।

५. नगरेषु इदानीं परिसरमालिन्यम् अधिकमस्ति । तस्मात् जनाः रुग्णाः भवन्ति । उत्तमस्वास्थ्यं प्राप्तुं प्रत्यहं योगाभ्यासः करणीयः । सर्वे भवन्तु सुखिनः ।

६. प्राणिषु मानवः श्रेष्ठः । न तत्र कारणं शक्तिः आकारो वा । किन्तु असदृशी बुद्धिः विवेकः च । तथापि लोकेऽस्मिन् एकैकस्मात्, प्राणिनः वस्तुनः च मानवस्य ज्ञातव्यं किञ्चित् विद्यते ।

७. कुरुक्षेत्रे सर्वे पाण्डवाः कौरवाः च युद्धाय सन्नद्धाः आसन् । अर्जुनः एकः महावीरः । तस्य सारथिः भगवान् श्रीकृष्णः । उभयोः पक्षयोः सर्वे युद्धसन्नद्धाः अभवन् ।

८. इन्दुः रात्रौ उदयते । इन्दोः प्रकाशः चन्द्रिका । चन्द्रिकायाः ज्योत्स्ना कौमुदीति अपरे नाम्नी । सा शीतला आह्लादकरी च वर्तते ।

****

© KTBS Not to be republished

## संस्कृतभाषया अनुवादं कृत्वा लिखत ।

1. ವಿದ್ಯಾರ್ಥಿಗಳು ಪ್ರತಿದಿನ ಶಾಲೆಗೆ ಹೋಗುತ್ತಾರೆ. ಶಾಲೆಯಲ್ಲಿ ಅಧ್ಯಾಪಕರು ಪಾಠಗಳನ್ನು ಮಾಡುತ್ತಾರೆ. ವಿದ್ಯಾರ್ಥಿಗಳು ಗುರುಗಳ ಮಾರ್ಗದರ್ಶನವನ್ನು ಅನುಸರಿಸುತ್ತಾರೆ. ಜೀವನದಲ್ಲಿ ಸಫಲತೆಯನ್ನು ಪಡೆಯುತ್ತಾರೆ.

2. ಇದು ಸುಂದರವಾದ ಲಾಲ್‌ಬಾಗ್ ಉದ್ಯಾವನವಾಗಿದೆ. ಇದು ಕ್ರಿ.ಶ.18ನೇ ಶತಮಾನದಲ್ಲಿ ನಿರ್ಮಾಣವಾಯಿತು. ಬೆಳಿಗ್ಗೆ ಹಾಗೂ ಸಂಜೆ ನಗರವಾಸಿಗಳು ಇಲ್ಲಿ ಸಂಚರಿಸುತ್ತಾರೆ. ವಿಶ್ರಾಂತಿಯನ್ನು ಆರೋಗ್ಯವನ್ನು ಆನಂದವನ್ನು ಪಡೆಯುತ್ತಾರೆ.

3. ಹಿಂದೆ ಬಡವನೂ ಮೂರ್ಖನೂ ಆದ ಕಮಲಾಕರನೆಂಬ ಬಾಲಕನು ಇದ್ದನು. ಎಲ್ಲರೂ ಅವನನ್ನು ನೋಡಿ ಅಪಹಾಸ್ಯ ಮಾಡುತ್ತಿದ್ದರು. ಇದರಿಂದ ಅವಮಾನಿತನಾದ ಅವನು ಕಾಶಿಗೆ ಹೋಗಿ ಚೆನ್ನಾಗಿ ಓದಿ ಮಹಾಜ್ಞಾನಿಯಾದನು. ಆದ್ದರಿಂದ ಪ್ರಯತ್ನ ಪಟ್ಟರೆ ಅಸಾಧ್ಯವಾದುದು ಯಾವುದೂ ಇಲ್ಲ.

4. ಪ್ರಿಯ ವಿದ್ಯಾರ್ಥಿಗಳೇ, ಪ್ರತಿದಿನವೂ ನೀವು ಚೆನ್ನಾಗಿ ಓದಿ, ಕಾಲಹರಣ ಮಾಡಬೇಡಿ. ಹೋದ ಸಮಯ ಮತ್ತೆ ಬಾರದು. ಸುಖವನ್ನು ಬಯಸುವವನು ವಿದ್ಯೆಯನ್ನು ಬಿಡಬೇಕು. ವಿದ್ಯೆಯನ್ನು ಬಯಸುವವನು ಸುಖವನ್ನು ಬಿಡಬೇಕು.

5. ಭಾರತವು ವಿಶಾಲವಾದ ದೇಶ. ಇಲ್ಲಿ ವಿವಿಧ ಧರ್ಮೀಯರ ಎಲ್ಲಾ ಮತಸ್ಥರ ಅಸಂಖ್ಯಾತ ಪುಣ್ಯಕ್ಷೇತ್ರಗಳ ದರ್ಶನವು ಮಾನಸಿಕ ಹಾಗೂ ಧಾರ್ಮಿಕ ತೃಪ್ತಿಯನ್ನು ನೀಡುತ್ತದೆ.ಅಲ್ಲಿಯ ಪ್ರಕೃತಿ ಸೌಂದರ್ಯವು ಮನಸ್ಸನ್ನು ಆಕರ್ಷಿಸುತ್ತದೆ.

6. ಸುಭಾಷಿತವೆಂದರೆ ಒಳ್ಳೆಯ ಮಾತು. ಸಂಸ್ಕೃತ ಭಾಷೆಯಲ್ಲಿ ಮನೋಹರವಾದ ಸುಭಾಷಿತಗಳಿವೆ. ಇವು ನೀತಿಯನ್ನು ಉಪದೇಶಿಸುತ್ತವೆ. ತತ್ವವನ್ನು ಮತ್ತು ಲೋಕವ್ಯವಹಾರವನ್ನು ಬೋಧಿಸುತ್ತವೆ.

7. ಗ್ರಾಮದ ಹೊರಗೆ ಸುಂದರವಾದ ಸರೋವರ ಇದೆ. ಸರೋವರದಲ್ಲಿ ಕಮಲಗಳು ಅರಳುತ್ತವೆ. ಕೆರೆಯಲ್ಲಿ ಮೀನುಗಳು ವಾಸಿಸುತ್ತವೆ. ನೀರಿಲ್ಲದೆ ಮೀನುಗಳು ಬದುಕುವುದಿಲ್ಲ. ಕೆರೆಯ ನೀರು ಸಿಹಿಯಾಗಿದೆ.

8. ಇದು ನಮ್ಮ ಊರಿನ ದೇವಾಲಯ. ಇದರ ಮುಂಭಾಗದಲ್ಲಿ ಸರೋವರವೂ, ಹಿಂಭಾಗದಲ್ಲಿ ಉಪವನವೂ ಇದೆ. ಇದರ ಬಲಭಾಗದಲ್ಲಿ ಅಂಗಡಿಯೂ ಎಡಭಾಗದಲ್ಲಿ ಅಂಗಣವೂ ಇದೆ

.*******

©KTBS Not to be republished

## पूरकपाठः

# १. गतानुगतिको लोकः

एकस्मिन् ग्रामे एकः कृपणःभिक्षुकः आसीत् । सः प्रतिदिनं भिक्षाटनं कृत्वा धनं सम्पादयति स्म। सः स्म्पादितं धनम् एकस्मिन् ताम्रपात्रे स्थापयति स्म । बहुदिनानन्तरं तस्य धनपात्रं पूर्णम् । तदा सः एवं चिन्तयति ।

अहम् एतद् धनपात्रं स्वीकृत्य काशीं गमिष्यामि । गङ्गास्नानं करिष्यामि। शिवपूजां करिष्यामि इति । ततः एकस्मिन् उत्सवदिने प्रातः सः भिक्षुकः काशीं गच्छति । स्नानार्थं गङ्गानदीं गच्छति। तत्र स्वस्य धनपात्रस्य रक्षणार्थं गङ्गातीरे सिकतासु गर्तं करोति । गर्ते पात्रं स्थापयति । अभिज्ञानार्थम् उपरि एकं शिवलिङ्गं, करोति । सन्तोषेण स्नानार्थं गच्छति । ततः तत्र आगताः भक्ताः जनाः शिवलिङ्गं दृष्ट्वा शिवलिङ्ग निर्माणम् अत्र नियमः इति मत्वा सर्वेऽपि एकैकं शिवलिङ्गं कुर्वन्ति। स्नानं समाप्य आगतः कृपणः बहूनि शिवलिङ्गानि पश्यति । अतः सः स्वस्य धनपात्रं प्राप्तुम् असमर्थः भवति । सः अतीव दूःखितो भवति । अत एव उच्यते

गतानुगतिको लोकः न लोकः पारमार्थिकः।
गङ्गासैकतलिङ्गेन नष्टं मे ताम्रभाजनम् ।। इति

## अभ्यासः

**१. दशवाक्यैः संस्कृत भाषया, कन्नड भाषया आङ्ग्ल भाषया वा उत्तरं लिखत ।**

१. कृपणस्य धनं कथं नष्टम् अभवत् ?

* * * * *

©KTBS Not to be republished

# २. वृद्धायाः देशप्रेम

कस्मिंश्चित् ग्रामे काचित् वृद्धा अस्ति । तस्याः चत्वारः पुत्राः सन्ति। ते सर्वे श्रमजीविनः शूराः च । एकदा तस्य देशस्य उपरि शत्रूणाम् आक्रमणं भवति। तदा देशे सर्वत्र युवकान् सैन्ये प्रवेशयन्ति । वृद्धा ज्येष्ठपुत्रम् आहूय वदति । ''पुत्र! देशरक्षणं अस्माकं कर्तव्यम् अस्माकं देशः इदानीम् आपत्काले अस्ति। अतः भवान् अपि सैनिकः भवतु । मातृभूमिरक्षणं करोतु'' इति । ज्येष्ठपुत्रः सन्तोषेण मातृवचनम् अङ्गीकरोति । रणाङ्गणं गच्छति । शौर्येण युद्धं करोति । वीरमरणं प्राप्नोति । वृद्धा पुत्रस्य मरणं शृणोति । किन्तु किञ्चिदपि विचलिता न भवति । द्वितीयपुत्रं युद्धार्थं प्रेषयति । द्वितीयः अपि युद्धे मरणं प्राप्नोति ।

वृद्धा इदानीम् अपि न खिन्ना । तृतीयपुत्रं अपि रणाङ्गणं प्रेषयति । तृतीयः अपि रणरङ्गे मृतः भवति । इदानीं वृद्धा चिन्तयति । ''चतुर्थं पुत्रं अपि रणरङ्गं प्रेषयामि'' इति । तदानीं तद् ग्रामीणाः आगत्य वदन्ति । ''मातः! भवती वृद्धा । अन्तिमकाले भवत्याः सेवार्थं कोऽपि नास्ति । अपि च भवत्याः वंशोद्धारार्थं एषः एकः एव पुत्रः अवशिष्टः । एतम् अपि मृत्युमुखं मा प्रेषयतु'' इति ।

तदा माता वदति ''मदीयानाम् पुत्राणाम् अपेक्षया मम जन्मभूमिः एव श्रेष्ठा । जन्मभूमिरक्षणापेक्षया अन्यत् महाकार्यं नास्ति एव'' इति। एवं सा चतुर्थं पुत्रम् अपि रणरङ्गं प्रेषयति । रणरङ्गे घोरं युद्धं प्रवर्तते । अत्र वृद्धायाः रात्रौ निद्रा अपि नास्ति। तस्याः एका एव चिन्ता स्वदेशस्य का गतिः भवेत् ? इति ।।

एकस्मिन् दिने प्रातः एकः ग्रामस्थः आगत्य दुःखेन वदति – ''मातः भवत्याः चतुर्थः पुत्रः अपि मृतः'' इति । तदा मातुः नयने अश्रूपूर्णे । ग्रामस्थः वदति– ''मातः, वयं तु प्रथमम् एव विज्ञापितवन्तः भवती अवशिष्टम् एकमेव पुत्रं मा प्रेषयतु इति । भवती अस्माकं वचनं न श्रुतवती । अधुना च रोदिति।'' माता –'' भोः, मम पुत्रः मृतः इति न रोदिमि । किन्तु अधुना युद्धार्थं प्रेषयितुं मम पञ्चमः पुत्रः नास्ति किल



©KTBS Not to be republished

इति रोदिमि। अस्माकं देशस्य का गतिः स्यात् ?

ग्रामस्थः:- तद्विषये चिन्ता मास्तु। भवत्याः पुत्रः पञ्चत्वं गतः । किन्तु देशः रक्षितः । विजयलक्ष्मीः अस्माकं पक्षम् आलिङ्गितवती । वयम् इदानीं विजयशालिनः इति एतत् श्रुत्वा वृद्धा अतीव हृष्टा भवति । अत एव उच्यते ''जननी जन्मभूमिश्च स्वर्गादपि गरीयसी'' इति उक्तिः प्रसिद्धा वर्तते।

## अभ्यासः

**१. दशवाक्यैः संस्कृत भाषया,कन्नड भाषया, आङ्ग्ल भाषया वा उत्तरं लिखत ।**

१. वृद्धायाः देशप्रेम विषये लिखत।

©KTBS Not to be republished

# ३.धर्मो रक्षति रक्षितः



©KTBS Not to be republished

यक्षः - किन्नु हित्वा प्रियो भवति किन्नु हित्वा न शोचति ।
किन्नु हित्वार्थवान् भवति किन्नु हित्वा सुखी भवेत् ।। १ ।।

धर्मराजः - मानं हित्वा प्रियो भवति क्रोधं हित्वा न शोचति ।
कामं हित्वार्थवान् भवति लोभं हित्वा सुखी भवेत् ।। २ ।।

यक्षः - कः शत्रुः दुर्जयः पुंसां कश्च व्याधिरनन्तकः ।
कीदृशश्च स्मृतः साधुः असाधुः कीदृशः स्मृतः ।। ३ ।।

धर्मराजः - क्रोधः सुदुर्जयः शत्रुः लोभो व्याधिरनन्तकः ।
सर्वभूतहितस्साधुः असाधुः निर्दयः स्मृतः ।। ४ ।।

यक्षः - किं स्वित् प्रवसतो मित्रं किं स्विन्मित्रं गृहे सतः ।
आतुरस्य तु किं मित्रं किं स्विन्मित्रं मरिष्यतः ।। ५ ।।

धर्मराजः - सार्थः प्रवसतो मित्रं भार्या मित्रं गृहे सतः ।

आतुरस्य भिषङ्मित्रं दानं मित्रं मरिष्यतः ।। ६ ।।

यक्षः - व्याख्यातः पुरुषो राजन् यश्चसर्वधनी नरः ।
तस्मात्त्वमेकं भ्रातॄणां यमिच्छसि स जीवतु ।। ७ ।।

धर्मराजः - धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः ।
तस्माद्धर्मं न त्यजामि मानो धर्मो हतोऽवधीत् ।। ८ ।।
यथा कुन्ती यथा माद्री विशेषो नास्ति मे तयोः ।
मातृभ्यां सममिच्छामि नकुलो यक्ष जीवतु ।। ९ ।।

यक्षः - तस्य तेऽर्थाच्च कामाच्चानृशंस्यं हि परं मतम् ।
तस्मात्ते भ्रातरः सर्वे जीवन्तु भरतर्षभ ।। १० ।।

**भावार्थः**

१. यक्षः धर्मराजं पृच्छति-राजन्, मानवः किं त्यक्त्वा सर्वेषां प्रियो भवति? किं त्यक्त्वा न शोचति? किं सन्त्यज्य धनवान् भवति? किं विहाय सुखी भवति?

२. धर्मराजः वदति । अभिमानत्यागेन सर्वेषां प्रियो भवति । कोपवर्जितो न शोचति। आशात्यागेन धनवान् भवति । अलोभात् नरः सुखी भवति ।

३. जेतुं दुःसाध्योऽरिः कः? कस्य रोगस्य अन्तो नास्ति? सज्जनः कः? असाधुः कः?

४. कोपः सुलभेन जेतुम् अशक्यः अरिः । लोभस्य अन्त एव नास्ति । सर्वे षां प्राणिनां हितं यः इच्छति सः साधुरित्युच्यते । दयारहितः असाधुरिति कथ्यते।

५. प्रवासे वयस्यः कः? गृहे वर्तमानस्य सखा को भवति ? रोगिणः मित्रं किम्? मृतस्य कः सुहृत् भवति?

©KTBS Not to be republished

६. प्रवासं कुर्वतः सार्थ (सयात्रिकः) एव मित्रं भवति । गृहे निवसतः पत्नी एव मित्रं भवति । रोगिणः वैद्यः एव मित्रं भवति । मृतस्य जीविते कृतं दानमेव मित्रं भवति ।

७. राजन्, पुरुषः कः? सर्वेभ्यः श्रेष्ठः धनिकः कः? इति त्वया सम्यक् निरूपितम् । अतः तव चतुर्णां भ्रातॄणां मध्ये त्वं कमिच्छसि स जीवतु इति यक्षः अवदत्।

८. यः धर्मं नाशयति, तं धर्म एव हन्ति । यो धर्ममाचरति तं धर्म एव रक्षति । अतोऽहं धर्मं न त्यजामि । नाशितः धर्मः अस्मान् हन्यात् ।

९. यथा कुन्ती मे माता तथा माद्री अपि । अनयोर्मध्ये भेदं न पश्यामि । तयोर्विषये मयि समानः आदरः वर्तते । अतः माद्रीसुतः नकुल एव जीवतु इत्यहमिच्छामि।

१०. हे भरतोत्तम ते अर्थकामाभ्यां दया (धर्मः) एव श्रेष्ठा इति ज्ञातम् । अतः ते चत्वारोऽपि भ्रातर जीवन्तु ।

पद्यभागोऽयं महाभारतस्य वनपर्वणः उद्धृतः । यदा नकुलादयः चत्वारोऽपि यक्षवचनम् अनादृत्य जलं पीत्वा मृता भवन्ति । तदा धर्मराजः स्वभ्रातॄन् अनागतान् विचिन्त्य जलाशयसमीपमागच्छति । यक्षः धर्मराजमपि पूर्ववदेव पृच्छति । धर्मराजो यथामति उत्तरं वदामि इति वदति । तयोः सम्भाषणस्य केचनांशाः अत्र स्वीकृताः।

कविः - व्यासः

मातापितरौ - सत्यवती पराशरः च ।

कालः - क्रि.पू षष्ठशतकात् पूर्वम् ।

जन्मस्थलम् - यमुनानदी द्वीपः

Not to be republished ©KTBS

| | |
|---|---|
| कृतिः | - महाभारतम्, अष्टादशपुराणानि, ब्रह्मसूत्राणि । |
| प्रशंसा | - अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः ।<br>अफाललोचनः शम्भुः भगवान् बादरायणः ।। |

## अभ्यासः

**१. दशवाक्यैः संस्कृत भाषया, कन्नड भाषया, आङ्ग्ल भाषया वा उत्तरं लिखत ।**

१. यक्षधर्मराजयोः सम्भाषणसारं सङ्गृह्य लिखत ।

*****

## अवधेयांशः

### महाभारतस्य महिमा

धर्मे ह्यर्थे च कामे मोक्षे च भरतर्षभ ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित् ।।
त्रिभिर्वर्षैः सदोत्थाय कृष्णद्वैपायनो मुनिः ।
माहाभारतमाख्यानं कृतवानिदमुत्तमम् ।।
अर्थशास्त्रमिदं प्रोक्तं धर्मशास्त्रमिदं महत् ।
कामशास्त्रमिदं प्रोक्तं व्यासेनामितबुद्धिना ।।

*****

©KTBS Not to be republished

# आभाणकाः

१. यादृशं भक्षयेदन्नं बुध्दिर्भवति तादृशी ।
२. निरस्तपादपे देशे एरण्डोऽपि द्रुमायते ।
३. जलबिन्दुनिपातेन क्रमशः पूर्यते घटः ।
४. वक्तुं सुकरं दुष्करम् अध्यवसितुम् ।
५. गतः कालो न पुनरायाति ।
६. यतो धर्मः ततो जयः ।
७. विद्या ददाति विनयम् ।
८. सद्भिः कुर्वीत सङ्गतिम् ।
९. हितं मनोहारि च दुर्लभं वचः ।
१०. अवयवशक्तेः समुदायशक्तिः बलीयसी ।
११. अन्धो मुकुरं प्राप्य नोपकृतो भविष्यति ।
१२. क्लेशः फलेन हि पुनर्नवतां विदत्ते ।
१३. पुराणमित्येव न साधु सर्वम् ।
१४. चक्रवत् परिवर्तन्ते सुखानि च दुःखानि च ।
१५. अभ्यासानुसारिणी विद्या, बुद्धिः कर्मानुसारिणी ।

*****

विराटनगरे रम्ये कीचकादुपकीचकम् ।
अत्र क्रियापदं वक्तु : हैमं दास्यामि कङ्कणम् ॥
विः = पक्षी, आट = सञ्चरति, हैमं = शीतलम्, कम् = जलम्

©KTBS Not to be republished

# १. सेतुपाठः

अष्टमकक्ष्यायां ये व्याकरणांशाः प्रदत्ताः, विशिष्य भाषाग्रहणे तेषां पुनस्मारणम्।

१. वर्णमाला । स्वराः, अयोगवाहौ, व्यञ्जनानि

२. माहेश्वरसूत्राणि ।

३. सुबन्तम् । अत्र सप्तविभक्तीनां लिङ्गभेदज्ञानपूर्वकं वाक्ये प्रयोगकौशलसम्पादनम्।

४. सन्धिकार्यपरिचयः - स्वरसन्धिः ।

५. तिङन्तम् - क्रियापदेषु धातु-लकारयोः भेदः तथैव विशेषक्रियापदानां परिचयः करोति -कुरुते, अस्ति -वर्तते अपि च लट्, लृट्, लोट् लङ् लकाराणां पुनस्मारणम्

६. संख्या - १ तः १०० पर्यन्तम् ।

७. समासः - द्वन्द्वः ।

**प्रश्नाः :-**

१. संस्कृतभाषायां कति स्वराः सन्ति?

२. माहेश्वरसूत्रेषु पञ्चमं सूत्रं किम्?

३. प्रातः पदस्य विरुद्धार्थकं पदं किम्?

४. कति वचनानि सन्ति?

५. राजा पदस्य समानार्थकं पदं किम्?

६. कति विभक्तयः वर्तन्ते?

©KTBS Not to be republished

७. लट् लकारे पठ् धातोः उत्तमपुरुषैकवचनरूपं किम्?

८. विद्यालयः इदं पदं विभज्य सन्धिनाम लिखत ।

९. राम शब्दस्य सप्तमीविभक्तिद्विवचनरूपं लिखत ।

१०. अपठत् इति क्रियापदम् - लकारे अस्ति ।

११. क्रियापदस्य मूलं किम्?

१२. ११.३० - सार्धैकादशवादनम् :: ८.१५ । अत्र चतुर्थं पदं किम्?

१३. रामकृष्णौ एतस्य विग्रहवाक्यं लिखत ।

१४. २४ एतस्य संख्यावाचकपदं लिखत ।

१५. रामः दशरथस्य पुत्रः । रेखाङ्कितपदमुद्दिश्य प्रश्ननिर्माणं कुरुत ।

*****

## अवधेयांशः

### केचन न्यायाः

| | |
|---|---|
| १. सूचीकटाहन्यायः । | २. मार्जारक्षीरन्यायः । |
| ३. अरण्यरोदनन्यायः । | ४. हंसक्षीरन्यायः । |
| ५. स्थालीपुलाकन्यायः । | ६. पङ्ग्वन्धन्यायः । |
| ७. अन्धगजन्यायः । | ८. काकतालीयन्यायः । |
| ९. वृक्षबीजन्यायः । | १०. हस्तामलकन्यायः । |

©KTBS Not to be republished

## २. वाक्यरचनाकौशलम्

* प्रदत्तं चित्रं दृष्ट्वा यथा छात्रः पञ्चवाक्यानि लिखति तथा अध्यापकः छात्रान् सूचयेत् ।

**उदाहरणम्-**




© KTBS Not to be republished

१) एषः विद्यालयोऽस्ति । २) विद्यालयस्य पुरतः ध्वजस्तम्भः भवति । ३) विद्यालयस्य पृष्ठतः वृक्षः अस्ति । ४) विद्यालयस्य पुरतः छात्राः सन्ति । ५) विद्यालयं परितः सस्यानि सन्ति ।

२.



गृहम्, अचलः, मार्गः, नदी, क्षेत्रम्, जलम्, उन्नतः, ग्रामः

©KTBS Not to be republished

३.



उद्यानम्, दीपः, शिलासनम्, वर्तुलाकारः, पर्वतः, विहरन्ति, उपविशन्ति

© NCERT
Not to be republished

४.



यानम्, मार्गः, जनाः, बालिका, आपणः, गच्छति, विक्रीणीते, भवानपि, शोभते

©KTBS Not to be republished

५.



नयनम्, मुखम्, कर्णः, मर्कटः,गान्धीमहोदयः, उपविशति, पश्यति, शृणोति

Not to be republished

# ३. गद्यावगाहनम्

**पाठः-१**

कस्मिश्चिद् ग्रामे एकः वृद्धः कृषकः अवसत् । सः परिश्रमी, दूरदर्शी तथा सरलस्वभावः आसीत् । तस्य चत्वारः पुत्राः आसन् । परं ते अलसाः अभवन् । ते कृषिकार्ये पितुः सहयोगं न अकुर्वन् । न च तेषां कृषिकार्ये रुचिः आसीत् ।

अस्मात् कारणात् वृद्धकृषकः चिन्तितवान्।

मरणासन्नावसरे सः स्वपुत्रान् अकथयत्, यत् मम क्षेत्रेषु गुप्तं धनं वर्तते, मम मरणानन्तरं क्षेत्राणि खनित्वा सुगुप्तं धनं प्राप्नुयुः। पुत्राः एतत् श्रुत्वा प्रासीदन्। पितुः मृत्योः पश्चात् निजक्षेत्राणि अकर्षयन् । परं सुगुप्तं धनं न लब्धम् । ते निराशाः सञ्जाताः । अन्ते मातुः प्रेरणया ते पुत्राः क्षेत्रेषु बीजानि अवपन् । परिणामतः प्रभूतं धान्यम् अभवत् । अपि च पितुः सुगुप्तधनस्य रहस्यम् अबोधन्।

**प्रश्नाः-**

१. कृषकः कुत्र अवसत्?
२. वृद्धकृषकस्य स्वभावः कीदृशः आसीत्?
३. वृद्धकृषकस्य पुत्राः स्वभावेन कीदृशाः आसन्?
४. गुप्तं धनं कुत्र वर्तते?
५. कदा सुगुप्तं धनं प्राप्नुयात्?

©KTBS Not to be republished

## पाठः-२

  

अथ कदाचित् तृषार्तः कोऽपि वायसः जलं प्राप्तुं सुचिरम् अभ्रमत् । परं सः काकः न कुत्रापि उदकं प्राप्तवान् । ततः शुष्कवदनः परिश्रान्तः चासौ प्राप्तवान् किमपि उद्यानम् । तत्र हि भाग्येन दृष्टवान् जलकुम्भम् ।

उपविश्य च तस्योपान्ते जलं पातुम् अयतत । किन्तु उदकं तस्मिन् घटे स्वल्पम् आसीत् । तस्मात् जलं प्रति चञ्चुं नेतुं सः नाशक्नोत् । तदा सः उपायं कृतवान् । सः घटे उपलानि चञ्च्वा उद्धृत्य अक्षिपत् । शीघ्रमेव जलम् उपरि आगच्छत् । तदा परितुष्टः सः भृशं जलम् अपिबत् ।

**प्रश्नाः-**

१. काकः घटं कुत्र दृष्टवान्?

२. काकः घटे कानि अक्षिपत्?

३. जलं प्राप्तुं कः अभ्रमत्?

४. परितुष्टः काकः किम् अकरोत्?

५. नाशक्नोत् पदं विभज्य लिखत ।

*****

©KTBS Not to be republished

**पाठः ३**

कस्मिंश्चित् ग्रामे कश्चन पण्डितः आसीत्। तस्य नाम भुकुण्डः इति। कदाचित् तस्योपरि कश्चन अपवादः आपतितः। राजभटाः तं कोविदं शृङ्खलया बद्ध्वा नृपस्य समीपं नयन्ति। भूपतिः तं विचार्य मरणदण्डनम् आदिशति। तदा भुकुण्डः 'अहं श्लोकमेकं वदामि कृपया अनुमतिं ददातु' इति प्रार्थयति।

भट्टिर्नष्टो भारविश्चापि नष्टः
भिक्षुर्नष्टो भीमसेनोऽपि नष्टः।
भुकुण्डोऽहं भूपतिस्त्वं हि राजन्
भभावल्यामन्तकस्सन्निविष्टः॥

इमं श्लोकं श्रुत्वा राजा तम् मरणदण्डनात् अमोचयत्।

**प्रश्नाः -**

१. पण्डितस्य नाम किम्?
२. कस्योपरि अपवादः आपतितः?
३. कोविदं के नयन्ति?
४. 'पण्डितः' पदस्य पर्यायपदं किम्?
५. भूपतिः किम् आदिशति?

| | | |
|---|---|---|
| भभावल्ली = | भ - भट्टिः, | भा - भारविः |
| | भि - भिक्षुः, | भी - भीमसेनः |
| | भु - भुकुण्डः, | भू - भूपतिः |
| अन्तकः=यमः | | |

©KTBS Not to be republished

**पाठः-४**

संस्कृतभाषा देवभाषा । प्रायेण सर्वासां भारतीयभाषाणां प्राणभूता इति । यथा प्राणी अन्नेन जीवति परन्तु वायुं विना अन्नमपि जीवनं रक्षितुं न शक्नोति तथैव अस्मद्देशस्य कापि भाषा संस्कृतभाषावलम्बं विना जीवितुम् अक्षमेति निःसंशयम्। अस्यामेव अस्माकं धर्मः,अस्माकमितिहासः, अस्माकं भूतं,भविष्यञ्च सर्वं सुसन्निहितमस्ति ।

**प्रश्नाः -**

१. संस्कृतभाषा कासां प्राणभूता अस्ति ?

२. प्राणी कं विना न जीवति ?

३. संस्कृतभाषायां किं किं सुसन्निहितम् अस्ति ?

४. अक्षमेति इदं पदं विभज्य लिखत ।

५. विना अव्ययेन वाक्यं रचयत ।

©KTBS Not to be republished

## ४. प्रश्नपत्रिका स्वरूपम्-IX

90 अङ्काः

### भागः- अ (गद्यम् पद्यम्)

| | |
|---|---|
| ✻ एकवाक्येन उत्तरं लिखत । | 10x1=10 |
| ✻ चतुर्थपदं लिखत । | 4x1=4 |
| ✻ लघूत्तराणि लिखत । | 4x2=8 |
| ✻ श्लोकयोः तात्पर्यं संस्कृतभाषया, कर्णाटकभाषया वा लिखत। | 2x2=4 |
| ✻ कवेः देश-काल-ग्रन्थानां विषये लिखत । | 1x3=3 |
| ✻ निर्देशानुसारम् उत्तरं लिखत। | 3x3=9 |
| ✻ दशवाक्यैः संस्कृतभाषया, आङ्ग्लभाषया, कर्णाटकभाषया वा उत्तरं लिखत । | 3x3=9 |
| ✻ पद्यं पूरयत । | 1x3=3 |
| ✻ अपठितगद्यम् | 1x4=4 |

### भागः- आ (व्याकरणम्)

| | |
|---|---|
| ✻ समुचितम् उत्तरं क्रमाक्षरेण सह चित्वा लिखत। | 10x1=10 |
| ✻ प्रयोपरिवर्तनं कुरुत । | 1x2=2 |
| ✻ वाक्यदोषं परिहरत । | 1x2=2 |
| ✻ अलङ्कारं विवृणुत । | 1x3=3 |

Not to be republished ©KTBS

* प्रस्तारं विलिख्य, गणविभागं कृत्वा छन्दसः नाम लिखत। 1x3=3

## भागः - इ (रचनात्मकविभागः)

* संस्कृतभाषा अनुवादं कुरुत । 1x3=3

* संस्कृतभाषया, कर्णाटकभाषया वा अनुवादं कुरुत। 1x3=3

* पत्रं लिखत । 1x5=5

* प्रबन्धं लिखत । 1x5=5

©KTBS Not to be republished

# ५. मार्गदर्शिनी प्रश्नपत्रिका
## IX Std. Summative Assessment-2

Max. Marks-90

## भागः - अ (गद्यम्-पद्यम्)

**एकवाक्येन उत्तरं लिखता।** 10x1=10

1. सिद्धारूढस्य गुरुः कः ?
2. प्राचीनकाले प्रसिद्धाःगणितज्ञाः के ?
3. बलिराजः केन पाताललोकं प्रवेशितः ?
4. के न योगमर्हतः ?
5. भीमः विराटराजेन कुत्र विनियुक्तः ?
6. आदिचुञ्चनगिरिक्षेत्रस्य प्रधानभूतः देवः कः ?
7. विक्रमार्कचरित्स्य नामान्तरं किम् ?
8. शर्वसुतः कः ?
9. नरः प्रत्यहं किं प्रत्यवेक्षेत ?
10. अनित्यानि कानि ?

**चतुर्थं पदं लिखत।** 4x1=4

11. त्रेतायुगम् :- श्रीरामः ; द्वापरयुगम् .................।
12. सागरः- समुद्रः सुरभारती.................।
13. सर्वलघुः- नगण : सर्वगुरु .................।
14. नमः- चतुर्थी; बहिः.................।

©KTBS Not to be republished

**लघूत्तराणि लिखत ।** 4x2=8

15. प्रासादं प्राप्ता अपि स्वामिचरणाः किमर्थं सभां नालङ्कुर्वन्ति ?

16. ब्रह्मराक्षसः कथं शापविमुक्तः अभवत्?

17. परमार्थतः शिवः कथमस्ति ?

18. सौभद्रः कथं ग्रहणं गतः?

वा

पुराणरीत्या आदिचुञ्चनगिरेः का कथा भवति ?

**श्लोकयोः तात्पर्यं संस्कृतभाषया कर्णाटकभाषया आङ्ग्लभाषया वा लिखत।** 2x2=4

19. वपुर्विरूपाक्षम् अलक्ष्यजन्मता
दिगम्बरत्वेन निवेदितं वसु।
वरेषु यद्बालमृगाक्षि मृग्यते
तदस्ति किं व्यस्तमपि त्रिलोचने ।।

20. गङ्गातुङ्गाकावेरीजलमस्माकं मत्वा
कृतसङ्कल्पाः कार्यं कर्तुम् आलस्यं हित्वा ।
सुवर्णपुष्पां पृथिवीमेतां क्रष्टुम् आयान्तु
प्रवहतु कामं स्वेदस्रोतः धैर्यं मा जहतु ऽ ऽ
भोः भोः, धैर्यं मा जहतु ऽ ।।

**कवेः देश-काल-ग्रन्थानां विषये लिखत ।** 1x3=3

21. विद्वान् जि. महाबलेश्वर भट्टः **वा** कालिदासः।।

**यथा निर्देशम् उत्तरं लिखत ।** 3x3=9

22. अस्मिन् चित्रे थूत्क्रियताम् ।

कः पाठः? कः अवदत्?कस्य चित्रे?

23. तवानुवृत्तिं न च कर्तुमुत्सहे ।

कः पाठः? कः अनुवृत्तिं कर्तुं न उत्सहे? काम् अवदत्?

©KTBS Not to be republished

24. सहजौ  मे प्रहरणम्।

क: पाठ: ? कम् अवदत्? कस्य भुजौ सहजौ प्रहरणम्?

**दशभि: वाक्यै: उत्तरं संस्कृतभाषया कर्णाटकभाषया आङ्ग्लभाषया वा लिखत।** 3x3=9

25. दीपावलिमहोत्सवस्य वैशिष्ट्यं लिखत ।

26. आदिचुञ्चनगिरि: इति नाम कथं प्रथितम्?

27. सुभाषितकार: चातकं सम्बोध्य किं वदति, तस्य सन्देश: क: ?

वा

बृहन्नला - अभिमन्य्वो: सम्भाषणं संगृह्य लिखत ।

**पद्यं पूरयत।** 1x3=3

28. उद्योगिनं.......................................

.............................................

.............................................

............................... कोऽत्रदोष: ।।

29 अनुच्धेदं पठित्वा उत्तरत

**पाठ:-४**

संस्कृतभाषा देवभाषा । प्रायेण सर्वासां भारतीयभाषाणां प्राणभूता इति । यथा  प्राणी अन्नेन जीवति परन्तु वायुं विना अन्नमपि जीवनं रक्षितुं न शक्नोति तथैव अस्मद्देशस्य कापि भाषा संस्कृतभाषावलम्बं विना जीवितुम् अक्षमेति नि:संशयम्।  अस्यामेव अस्माकं धर्म:,अस्माकमितिहास:, अस्माकं भूतं,भविष्यञ्च सर्वं सुसन्निहितमस्ति ।

©KTBS Not to be republished

प्रश्नाः -

१. संस्कृतभाषा कासां प्राणभूता अस्ति?

२. प्राणी कं विना न जीवति?

३. संस्कृतभाषायां किं किं सुसन्निहितम् अस्ति?

४. 'विना' अव्ययेन वाक्यं रचयत ।

1x3=3

## भाग-आ (व्याकरणम्)

**समुचितं उत्तरं चित्वा क्रमाक्षरेण सह लिखत।** 10x1=10

30. 'सज्जनः' इत्यत्र अयं सन्धिः अस्ति।

a.जश्त्वसन्धिः b.अनुनासिकसन्धिः c.श्चुत्वन्धिः d.अनुस्वारसन्धिः

31. 'कर्णार्जुनौ' अत्र अयं समासः अस्ति ।

a.कर्मधारयः b.द्विगुः c.द्वन्द्वः d.तत्पुरुषः

32. स्मृतः अस्य समानार्थकपदम् इदं भवति ।

a.मृतः b.विस्मृतः c.अमृतः d.ज्ञातः

33. लुब्धकः अस्य समानार्थक पदम् इदं भवति।

a.चरणः b.व्याघ्रः c.व्याधः d.पिकः

34. सम्प्रदानकारकस्य विभक्तिः एषा।

a.तृतीया b.पञ्चमी c.सप्तमी d.चतुर्थी

35. वन्दै एषः लकारः

a.लट् b.लुट् c.लृट् d.लोट्

©KTBS Not to be republished

36. उभावपि अस्य सन्धिविभजनम् एवं भवति ।

a.उभा+अपि b.उभौ+अपि c.उभाव + पि d.उभा + पपि

37. अत्र समूहेतर पदम् इदं भवति।

a.रामाय b.विहाय c.सूर्याय d.हरये

38. उत्तरपदार्थप्रधानः एषः समासः ।

a.द्विगुः b.कर्मधारयः c.तत्पुरुषः d.द्वन्द्वः

39. गणाः एते सन्ति।

a.अष्ट b.पञ्च c.षट् d.त्रयः

40. प्रयोगं परिवर्तयत । 1x2=2

a. अहं गुरुं नमामि

b. बालेन क्षीरं पीयते।

41. वाक्यदोषं परिहरत। 1x2=2

a. नगरेण अभितः उपवनम् अस्ति ।

b. भोजनस्य प्राक् हस्तपादं प्रक्षालय। 1x3=3

42. अलङ्कारं विवृणुत ।

विद्याधनं सर्वधनप्रधानम् ।

प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दो नाम लिखत। 1x3=3

43. सम्पूर्णकुम्भो न करोनि श्ब्दम्।

©KTBS Not to be republished

## भागः-इ (रचनात्मक विभागः)

**संस्कृत भाषया अनुवादयत।** 1x3=3

44. ಇದು ನಮ್ಮ ಊರಿನ ದೇವಾಲಯ. ಇದರ ಮುಂದೆ ಸರೋವರವಿದೆ. ಹಿಂದೆ ಉಪವನವಿದೆ. ಇಲ್ಲಿಗೆ ಜನರು ಬೆಳಿಗ್ಗೆ ಮತ್ತು ಸಾಯಂಕಾಲ ವಿಹರಿಸಲು ಬರುತ್ತಾರೆ.

**कर्णाटकभाषया आङ्ग्लभाषया वा अनुवादं कुरुत।** 1x3=3

45. इन्दुः रात्रौ उदयते। इन्दोः प्रकाशः चन्द्रिका। चन्द्रिकायाः ज्योत्स्ना इति नाम अस्ति। सा शीतला आह्लादकारिणी च वर्तते।

46. दिनत्रयं विरामं सम्प्रार्थ्य कक्ष्याध्यापकं प्रति विरामपत्रं लिखत 1x5=5

वा

शालावार्षिकोत्सवविषये मित्रं प्रति पत्रं लिखत।

**प्रबन्धं लिखत** 1x5=5

47. जनसंख्यास्फोटः **वा** दूरदर्शनम्

***

©KTBS Not to be republished

# ६. पदकोषः

| | | |
|---|---|---|
| अधिकृतः | ಅಧಿಕಾರ ಹೊಂದಿದ | Authoritatively |
| अनुशासनम् | ಆದೇಶ | Instruction |
| अनूद्य | ಅಧ್ಯಯನಮಾಡಿ | Having studied |
| अन्तेवासी | ಶಿಷ್ಯ | Student |
| अभिलषितम् | ಇಚ್ಛಿಸಿದ | Desied |
| अधिष्ठानम् | ಪಟ್ಟಣ | City |
| अमेध्यम् | ಮಲ | Human shit,stool |
| अशेषः | ಸಂಪೂರ್ಣ | Entire, Complete |
| अजिनम् | ಚರ್ಮ | Skin |
| अकिञ्चनः | ಬಡವ | Poor |
| अधरः | ಕೆಳತುಟಿ | Down lips (lowerlip) |
| अनुस्यूतः | ನಿರಂತರ | Continuously |
| अम्भोदः | ಮೋಡ | Cloud |
| अन्वयः | ವಂಶ | Dynasty leanage |
| अचलः | ಪರ್ವತ | Mountain |
| अहिः | ಹಾವು | Snake, serpent |
| आयुक्तः | ಪ್ರತಿನಿಧಿ | Representative |
| आम्लः | ಹುಳಿ | Sour |
| आम्रः | ಮಾವು | Mango |
| आयतनम् | ಕಟ್ಟಡ | Building |
| आखेटकः | ಬೇಟೆಗಾರ | A hunter |
| आली | ಗೆಳತಿ, ಸಾಲು | A female friend, line |

©KTBS Not to be republished

| | | |
|---|---|---|
| अनलः | ಬೆಂಕಿ | Fire |
| अंसः | ಹೆಗಲು | Shoulder |
| आर्तः | ದು:ಖ | Pathetic |
| उच्छिष्ठम् | ಎಂಜಲು | Leftover |
| उपयन्ता | ವರ, ಮದುಮಗ | Bridegroom |
| उदधिः | ಸಮುದ್ರ | Ocean |
| उत्सङ्गः | ತೊಡೆ | Lap, theigh |
| उत्सिक्तः | ಅಹಂಕಾರಿ | Egoist |
| कटुः | ಖಾರ | Hot |
| कर्गजः | ಕಾಗದ | Paper |
| कृत्स्नम् | ಸಂಪೂರ್ಣ | Complete |
| कुल्या | ಕಾಲುವೆ | Cannal |
| कूर्मः | ಆಮೆ | Tortoise |
| कूर्दः | ಸ್ಪರ್ದೆ | Competition |
| ग्रीवा | ಕುತ್ತಿಗೆ, ಕಂಠ | Neck |
| क्षितिः | ಭೂಮಿ | Earth |
| क्षुत् | ಹಸಿವು | Hunger |
| ग्रहणम् | ಹಿಡಿಯುವಿಕೆ | Holding |
| घृतम् | ತುಪ್ಪ | Ghee |
| छिद्रम् | ರಂಧ್ರ | Hole |
| जरा | ಮುದಿತನ | Old age |
| जवनिका | ಪರದೆ | Screen |
| तटाकः | ಕೆರೆ | Lake |
| दशास्यः | ರಾವಣ | Ravana (ademan) |
| दिवः | ಸ್ವರ್ಗ | Heaven |

©KTBS Not to be republished

| | | |
|---|---|---|
| दुकूलः | ರೇಶ್ಮೆ ಬಟ್ಟೆ | Silkgarment |
| नभः | ಆಕಾಶ | Sky |
| निर्झरिणी | ಕಿರುತೊರೆ | A small falls |
| निशम्य | ಕೇಳಿ | Having heard |
| निशा | ರಾತ್ರಿ | Night |
| पर्युषितम् | ತಂಗಲು, ಉಳಿದುಕೊಳ್ಳಲು | Tostay |
| पनसः | ಹಲಸಿನಹಣ್ಣು | Jock fruit |
| पदातिः | ಕಾಲಾಳು | soldier |
| पन्थाः | ಮಾರ್ಗ | Road |
| प्रसूतिः | ಜನನ | Birth |
| पिनाकपाणिः | ಶಿವ | Lord shiva |
| पितृसद्म | ಮಸಣ,ಸ್ಮಶಾನ | Graveyard |
| पृथक् | ಬೇರೆ | Separate |
| प्रतिपत् | ಪಾಡ್ಯ | First day after full-moon |
| प्रणेता | ರಚಿಸಿದವನು | Writer |
| प्रहरणम् | ಆಯುಧ | Weapon |
| पिकः | ಕೋಗಿಲೆ | Peacock |
| पीतम् | ಹಳದಿ | Yellow |
| पीनम् | ದಪ್ಪ | Bulky |
| बाहुः | ತೋಳು | Arm, shoulder |
| ब्राह्मणः | ಬ್ರಹ್ಮಜ್ಞಾನಿ | |
| भूतिः | ಮಂಗಲ | Auspicious |
| भल्लूकः | ಕರಡಿ | Bear |
| महानसः | ಅಡುಗೆ ಮನೆ | Kitchen |

©KTBS Not to be republished

| | | |
|---|---|---|
| मातुलः | ಸೋದರ ಮಾವ | Maternal uncle |
| मृग्यते | ಹುಡುಕಲ್ಪಡುತ್ತದೆ | It is searched out |
| मृत्तिका | ಮಣ್ಣು | Soil clay |
| मण्डूकः | ಕಪ್ಪೆ | Frog |
| मेलापकः | ಗುಂಪು | Group |
| यामः | ಮೂರುಗಂಟೆಯ ಅವಧಿ | Ameridian |
| रासभः | ಕತ್ತೆ | Donkey |
| रौप्यम् | ಬೆಳ್ಳಿ | Silver |
| राजीवः | ಕಮಲ | Lotus |
| लुब्धकः | ಬೇಟೆಗಾರ | Hunter |
| वह्निः | ಬೆಂಕಿ | Fire |
| वपुः | ಶರೀರ | Body |
| वणिक् | ವ್ಯಾಪಾರಿ | Businessman |
| वटिका | ದೋಸೆ | Cake, Dosa |
| वर्णी | ಬ್ರಹ್ಮಚಾರಿ | An unmarried man |
| वटुः | ಬ್ರಹ್ಮಚಾರಿ | An unmarried man |
| वर्त्म | ಮಾರ್ಗ,ದಾರಿ | Way, road |
| वराहः | ಹಂದಿ | Pig |
| वाङ्मयः | ಸಾಹಿತ್ಯ | Literature |
| वाञ्छा | ಆಸೆ | Desire |
| विचिकित्सा | ಜಿಜ್ಞಾಸೆ | |
| व्यसनम् | ಅಭ್ಯಾಸ | habit |
| वाटिका | ಉದ್ಯಾನ | garden |
| वसु | ಸಂಪತ್ತು,ಐಶ್ವರ್ಯ | wealth |
| विपिनम् | ಕಾಡು, ಅರಣ್ಯ | forest |

©KTBS
Not to be republished

| | | |
|---|---|---|
| व्यस्तम् | ಒಂದು | single |
| व्याजः | ನೆಪ | reason |
| शिष्टः | ಒಳ್ಳೆಯವನು | A Good man |
| शोणितम् | ರಕ್ತ | Blood |
| शौण्डीर्यम् | ಪರಾಕ್ರಮ | Bravery |
| सूत्रिका | ಶಾವಿಗೆ | Noodles |
| सरित् | ನದಿ | River |
| स्तोकम् | ಸ್ವಲ್ಪ | Some, alittle |
| सुहृत् | ಸ್ನೇಹಿತ | Friend |
| ह्रीः | ನಾಚಿಕೆ | shy |

*****

©KTBS Not to be republished

# ७. पाठयोजना

| मासाः अवधयः च | पाठाः | अवधयः |
|---|---|---|
| जून् २४ | सेतुपाठः<br>शरणं प्रपद्ये (कण्ठपाठः करणीयः)<br>सुबन्तम् | १५<br>०६<br>०३ |
| जुलै २४ | सिद्धारुढभारती।<br>कृदन्ताव्ययानि ।<br>तिङन्तम् उपसर्गाः च<br>छन्दः । (अनुष्टुप्)<br>पत्रलेखनम् (१,२)<br>पूरकपाठः -१ | ०८<br>०४<br>०५<br>०४<br>०१<br>०१ |
| आगस्ट् २३ | परोपकारः पुण्याय ।<br>सन्धिः ।<br>अलङ्कारः (शब्दालङ्कारः) ।<br>विस्मृतभेदाः सन्तः ।<br>प्रबन्धः (१,२) । | ०८<br>०४<br>०४<br>०५<br>०२ |
| सेप्टेम्बर् १५ | मूर्तिपूजारहस्यम् ।<br>प्रयोगाः ।<br>अनुवादाः (१-४ )(१-४) | ०८<br>०३<br>०४ |
| अक्टोबर् १० | दीपावलिः ।<br>समासः । | ०४<br>०६ |
| नवेम्बर् २२ | मार्गस्थो नावसीदति(कण्ठपाठः करणीयः) ।<br>पत्रलेखनम् (३) ।<br>सिद्धिक्षेत्रम् | ०८<br>०६<br>०८ |

©KTBS Not to be republished

| | | |
|---|---|---|
| डिसेम्बर्<br>२४ | कारकाणि । विशेषव्याकरणांशाः च<br>अलङ्कारः (अर्थालङ्कारः)।<br>आत्मविडम्बनम् ।<br>पूरकपाठः -२ | ०३<br>१०<br>१०<br>०१ |
| जनवरी<br>२५ | सौभद्रो ग्रहणं गतः<br>प्रबन्धः (३,४)<br>पूरकपाठः (३)<br>अनुवादाः (४-८) (४-८) | ०३<br>०८<br>०२<br>१२ |
| फेब्रवरी<br>२० | वेदगणितज्ञः।<br>छन्दः (इन्द्रवज्रा)<br>वाक्यरचना कौशलम्।<br>गद्यावगाहनम् | ०३<br>१०<br>०३<br>०४ |
| मार्च्<br>१० | पुनरावर्तनम् । | १० |

**नारिकेलसमाकारा दृश्यन्ते खलु सज्जनाः ।**
**अन्ये बदरिकाकारा बहिरेव मनोहराः ।।**

*****

©KTBS Not to be republished